
३ स्वशिष्यान्वेषणायाथ तद्वनं समुपागतः ।३

८ मुनीश्वरः । प्रत्येकं नाम गोत्राणि मुनिः शुद्धेन चेतसा । समुच्चार्य करोत्स्नानं मदालिप्य महा
मतिः । ददौ ~~तत्स्नानजं~~ पुण्यं तस्मा मुक्तिः क्षणादभूत् । शरीराण्यथ ते सर्वे पूर्वकर्मविचितानि
तु । विहाय पूर्वदेहांस्तु प्रापुः शुद्धेन चेतसा । इति माघ पंचदशाध्याय सार संग्रहः । मा
घमाहात्म्यमखिलं शांडिल्योपि महामुनिः । अष्टाविंशति संख्येभ्यः पुरुषेभ्योऽवदच्चदा । श्रु
त्वा स्नात्वाथ संतुष्टा माघमाहात्म्यमुत्तमं । शांडिल्यं पूजयामासुः सुयज्ञं च महामतिं । अ
नुज्ञातास्ततस्तेभ्यो यथाकामं गतास्तु ते । तत्रैकस्तु दिलीनाम गंधर्वस्त्रिदिवं ययौ । स
प्तविंशति संख्याकाः पुरुषाः संशितव्रताः । बभूवुश्च सुतास्तस्य सुयज्ञस्य महात्मनः । ना
म्ना पंचशिखाः सर्वे तपोनिष्ठा महाबलाः । माघे मासि पुनः स्नानं कृत्वा माधवपूजनं ।
तेन लब्ध्वा महापुण्यं ज्ञानं मुक्तिं चापि प्रपेदिरे । शांडिल्योपि सुयज्ञेन साकं स्वाश्र
ममाययौ । इति श्री वायुपुराणे माघमाहात्म्ये षोडशाध्याय सार संग्रहः । ×

भागवत षष्ठ स्कं. अ प्रथमाध्याये। श्री शुक उवाच। न चेदिहैवापचितिं यथांहसः कृतस्य
कुर्यान्मन उक्ति पाणिभिः। ध्रुवं स वै प्रेत्य नरकानुपैति ये कीर्तिता मे भवतस्तिग्मयात
नाः।१।तस्मात्पुरैवाश्विह पापनिष्कृतौ यतेत मृत्योरविपद्यतात्मना। दोषस्य दृष्ट्वा गु
रुलाघवं यथा भिषक्चिकित्सेत रुजां निदानवित्।२।न तथा ह्यघवान्राजन्पूयेत त
पआदिभिः। यथा कृष्णार्पितप्राणस्तत्पुरुषनिषेवया।३।एकादशस्कंधे। श्री भगवा
नुवाच। पथ्य सद्भिः पथि पुनः शिश्नोदरपरायणैः। आस्थितो रमते जंतुस्तमो विशति
पूर्ववत्।४।सत्यं शौचं दया मौनं बुद्धिः श्रीर्ह्रीर्यशः क्षमा। शमो दमस्तपश्चेति दुःसंगा
द्याति संक्षयं।५।ततो दुःसंगमुत्सृज्य सत्सु सज्जेत बुद्धिमान्। संत एवास्य छिंदंति मनो
व्यासंगमुक्तिभिः।६।सदा संतोभिगंतव्या यद्यप्युपदिशंति न। याहि स्वैरकथास्ते
षामुपदेशा भवंति ताः।७। षष्ठस्कंध तृतीयाध्याये यमदूतां प्रति धर्मराज उवाच। एवं विम

४०
९

रयसुधियो भगवत्प्रपन्नं तेसर्वात्मनापिदधते खलुभावयोगं। तेमेनदंडमर्हंत्यथयद्यमी
षांस्यात्पातकं तदपिहंत्युरुगायवादः।८। श्रीशुकउवाच। तस्मात्संकीर्तनंविष्णोर्जग
न्मंगलमंहसां। ~~महत्त्वं~~ महतामपिकौरव्यविद्ध्यैकांतिकनिष्कृतिं।८। विस्तृतंयैनात्रि
रूपितमेवप्राक्। अथमार्कंडेयसा पूर्वमाहात्म्यं॥ श्रीमद्भागवतेद्वादशस्कंधे[illegible]माध्याये। सूतउवाच। प्राप्त
द्विजातिसंस्कारोमार्कंडेयः पितुः क्रमात्। छंदांस्यधीत्यधर्मेण तपःस्वाध्यायसंयुतः॥ आराध्य
हृषीकेशंजिग्येमृत्युंसुदुर्जयं। तस्यैवंयुंजतश्चित्तं महायोगेनयोगिनः। व्यतीयायमहान्कालो
मन्वंतरषडात्मकः। तस्यैवंयुंजतश्चित्तं तपःस्वाध्यायसंयमैः। अनुग्रहायाविरासीन्नरना
रायणोहरिः। नरेणसहितोनारायणनामाहरिराविरासीदित्यर्थः। मार्कंडेयः। तयोरासन
माधायपादयोरवनिज्यच। अर्हणेनानुलेपेनधूपमाल्यैरपूजयत्। तत्रैववनमध्याये। संस्तुतो
भगवानिशंमार्कंडेयेनधीमता। नारायणोनरसखः प्रीतआहभगद्वहं। भोभोब्रह्मर्षि ४०
९

१२५
११(७)२

अथ

मार्कण्डेयाख्यानसारसंग्रहः

४४

१३

१८५
―
॥(८) २

७३

अथ

"मार्कण्डेयाख्यानसार संग्रहः"

४४

बतारैक्येना

नकेवलं त्रयाणामेवाभेदं पश्यंतीत्येतावदेव। अपितु आत्मनः स्वस्य जनस्य सर्वजीवनिकायस्यापिप
रमात्मना। बिंबप्रतिबिंबभावेन जलतरंगन्यायेन वा अभेदं पश्यंतीत्यर्थः। एतेन जीवेनानुप्रविश्य
नामरूपे व्याकरवाणीति श्रुतेः। सत्यपि भेदापगमे नाथ तवाहं न मामकीनस्त्वं। सामुद्रो हि तरंगः क्व
चन समुद्रो न तारंग इति भगवत्पादोक्तेश्च। बिंबस्यादर्शादौ प्रतिबिंबस्वरूपेणानुप्रवेशवत् स्व
तः सिद्धपरमात्मनो जीवरूपेण स्थूलसूक्ष्मदेहेष्वनुप्रवेश इति श्रुत्यर्थः। ननु अस्मत्प्रतिबिंबत्वरूपा
२ त्तस्मात्कारणात् त्रयाणामन्यतमभक्तस्यापि अभेनान्यतमभक्तस्याविशेषाद्वाकारणात् वयं ब्रह्मवि
ष्णुमहेशानामन्यतमायुष्मान् त्रयाणामन्यतमभक्तानपि इमेहि भजेम स्वप्रतिबिंबे स्वभक्ते वृषस्य
प्रीतेर्लोके कस्यापेक्षा इति श्लोकगतार्थः। वेद देवविशदपाति। श्रीहरिणेभ्यो नमस्यामो येऽस्मद्रूपं त्रयी
मयं। विश्वस्यात्मसमाधानतपःस्वाध्यायसंयमैः। यादृग्याद्गुपाधिनेमेत्यंतादृक्तादृक्काकूलत्वस.
प्रतिबिंबे बिंबधर्मविष्करणं भवतीत्याह। श्रवणाद्दर्शनाद्वापि महापातकिनोपिवः। शुध्येरन्नं
त्यजाश्चापि किमु संभाषणादिभिः। इति चंद्रललामस्य धर्मगुह्योपबृंहितं। वचोमनायनमृषि
नीलपुष्करण्योः पिबन्। सन्धिरं मायया विक्रोभ्रमितः कर्हितोभ्दशां। शिववागमनलध्वस्त

४३
१२ केशपुंअस्तमब्रवीत्। ऋषिरुवाच। अहो ईश्वरमायेयं दुर्विभाव्या शरीरिणां। यन्नमंतीशितव्यानि
स्तुवंति जगदीश्वराः। ईशितव्यानि ईश्वरनियम्यानि मादृशानि प्राणिजातानि अस्मा ब्राह्मणा
नि समर्थः पघपापसापपा जगदीश्वराः प्रयै ब्रह्मविष्णुशिवाः नमंति स्तुवंति अतइयं दुर्विज्ञेया माया।
अहो इत्याश्चर्ये। धर्मं ग्राहयितुं प्रायः प्रवक्तारश्च देहिनां। आचरंत्यनुमोदंते क्रियमाणं स्तुवंति च।
क्रियमाणं स्थानेभि नमस्थिमादृशां स्तुवंतीर्थः। कंचणेनुचरंभूमन्यरं ब्रह्मदर्शनात्। यद्दर्शनात्पूर्णकामः
सत्यकामः पुमान्भवेत्। परमेकंचणेथापि पूर्णकामाभिवर्षणात्। भगवत्यच्युतां भक्तिं तत्प
रेषु तथा त्वयि। इत्यार्चितोभिष्टुतश्च मुनिना सूक्तया गिरा। तमाह भगवान् शर्वः शर्वाण्या चाभि
नंदितः। कामस्तेयं महर्षेस्तु भक्तिमास्त्यमधोक्षजे। आकल्पांताद्यशः पुण्यमजरामरतातथा।
ज्ञानं त्रैकालिकं ब्रह्मन्विज्ञानं च विरागवत्। ब्रह्मवर्चस्विनो भूयात्पुराणाचार्यतास्तुते। ए णा
वंवरान्समुनये दत्वागात्र्यक्ष ईश्वरः। देव्यै तत्कर्म कथयन्ननुभूतं पुरामुना। अनुवर्णितमेत
त्मार्कंडेयस्य धीमतः। अनुभूतं भगवतो मायावैभवमद्भुतं। इति मार्कंडेयाख्यानसारसं

ग्रहः।

४ वैलक्षण्यं

४२ ति। वयमपि त्रिलोकगुरवो ब्रह्मविष्णुशिवा लोकशिक्षार्थं वंदनादिकं कुर्महे इत्याह। स लोका लोकपाला
११ स्मान्वदंते वै सुपासते। अर्हयेम भगवान्ब्रह्मा स्वयं च हरिरीश्वरः॥ किंच। न ते मय्यच्युतेजे च भिदाम
ण्वपि चक्षते। नात्मनश्च जनस्यापि तद्युष्मान्वयमीमहि॥ ये भवादृशा अस्मदुक्ता ब्राह्मणास्ते म
यि शिवे विष्णौ ब्रह्मणि अजे हिरण्यगर्भे च भिदां परस्परं भेदं अण्वपि संपूर्णज्ञानै१श्वर्य२बल३शक्ति४
वीर्य५तेज६आदिगुणेषु अंतः सृष्टिस्थितिसंहारेषु च किंचिदपि वैलक्षण्यं न चक्षते न पश्यंति ए
क एव परमात्मा स्वयं निर्धर्मकोपि स्वयोगमायया ईश्वरभावं प्राप्तः सन्नवतारभेदेन जगत्सृष्टि
स्थितिप्रलयान्कुर्वन्नपि स्वयमनुपद्यन्स्वात्मैक्येन विराजत इति जानंतीत्यर्थः। न कार्यः संशयो
यासन्नानाशक्तियुते विभौ। निजेच्छया वसते नैकरूपकः कल्पभेदतः। क्वचिच्छिवात्सृष्टिरुक्ता
क्वचिद्ब्रह्मणो क्वचिदीश्वरः। भगवत्या क्वचित्प्रोक्ता क्वचित्सूर्यान्निजाननात्। क्वचिच्च ब्रह्म
णः प्रोक्ता सर्वं तच्छास्त्रसम्मतं। स शापकुरुते योत्र स याति नरकं ध्रुवं। विचार्यमाणे पंचानां
भेदो नैवोपलभ्यते। यो भेदं नेक्षते नैव तान्स याति नरकाध्वरः। एक एव परानंदपूर्णोसौ परमे
श्वरः। स्वेच्छया पंचधा जातो लोकानुग्रहकारणात् इत्यादिगणेशपुराणादि पूर्वोक्तपंचा
यतनाभेदप्रक्रिया। निरूपितप्रमाणात्। अतएवात्र श्लोके त्र्याणामभेदकथनं गणेशसूर्ययो ११
रप्यभेदस्याप्युपलक्षणं ज्ञेयं।

सि वर्षसिंधु आत्मसमाधिना। वरं प्रतीच्छ भद्रं ते वरदेशादभीप्सितं। मार्कंडेय उवाच। जितं ते देवदेवे
श प्रपन्नार्तिहराच्युत। वरेणैतावतालं नो यद्भवान्समदृश्यत। अथाप्यंबुजपत्राक्ष पुण्यश्लोकशि
खामणे। द्रक्ष्ये मायां यया लोकः सपालो वेद सद्भिदां। यया सपालो लोको जनः सति निर्भेदे ब्र
ह्मणि भिदां भेदं वेद वेत्ति तां भवन्मायां द्रष्टुमिच्छामीत्यर्थः। सूत उवाच। इतीडितोर्चितः काममृ
षिणा भगवान्मुने। तथेति स स्मयन्प्रायाद्बदर्याश्रममीश्वरः। तथेति यथा त्वयाभिकांक्षितं तथा
स्त्विति वरं दत्वा प्रायात् गत इत्यर्थः। तस्यैकदा भृगुश्रेष्ठ पुष्पभद्रातटे मुनेः। उपासीनस्य संध्यायां
ब्रह्मन्वायुरभून्महान्। सक्ष्मांतरिक्षं सदिवं सभागणं त्रैलोक्यमासीत्सह दिग्भिराप्लुतं। स एक एवो
ज र्वरितो महामुनिर्बभ्राम विक्षिप्य जटा दिशांध वत्। अमुना मृत वर्षाणां सहस्राणि शतानि च। व्यती
युर्भ्रमतस्तस्य विष्णुमायावृतात्मनः। स कदाचिद्भ्रमंस्तस्मिन्पृथिव्याः ककुदि द्विजः। न्यग्रोधपोतं
ददृशे फलपल्लवशोभितं। प्रागुत्तरस्यां शाखायां तस्यापि ददृशे शिशुं। शयानं पर्णपुटके ग्र
संतं प्रभया तमः। तद्दर्शनाद्धीतपरिश्रमो मुदा प्रोत्फुल्लहृत्पद्मविलोचनांबुजः। प्रहृष्टरो
माद्भुतभावशंकितः प्रष्टुं पुरस्तं प्रससार बालकं। तावच्छिशो वै श्वसितेन भार्गवः सो

तः शरीरं मशको यथाविशत् । तत्राप्यदो न्यस्तमचष्ट कृत्स्नशो यथा पुरामुह्यदतीव विस्मितः । अचष्ट द
१० ष्टवान् । अथ तं बालकं वीक्ष्य नेत्राभ्यां धिष्ठितं हृदि । अभ्ययादतिसंक्लिष्टः परिष्वक्तुमधोक्षजं ॥ ताव
त्स भगवान्साक्षाद्योगाधीशो गुहाशयः । अंतर्दधे ऋषेः सद्यो यथेहानीशनिर्मिता । अनीशेन दरिद्रे
ण निर्मिता इहा मनोरथ उत्पत्तिमात्रं प्राप्य विलीयते तथा भगवद्रूपं दृष्टमात्रं सत्तिरोहितमित्यर्थः । अ
थ दशमेऽध्याये । सूत उवाच । स एवमनुभूयेदं नारायणविनिर्मितं । वैभवं योगमायायास्तमेव शरणं
ययौ । अथ श्रीनारायण एवास्य योगमायादर्शनश्रांतं मुनिं ब्रह्मविष्णुशिवानामत्यंताभेदं स्पष्टं कथय
न्त्रयाणामन्यतमस्य भक्तास्त्रयाणामपि ते भक्ता इति सूचयन् शिवस्वरूपेण बहुकालकृततपः
सिद्धिभाजं चकारेति वक्तुमुपक्रमते । सूत उवाच । तमेवं निभृतात्मानं वृषेण दिवि पर्यटन् । रु
द्राण्या भगवान्रुद्रो ददर्श स्वगणैर्वृतः । अथोमा तमृषिं वीक्ष्य गिरिशं समभाषत । कुर्वस्य तप
सः साक्षात्संसिद्धिं सिद्धिदो भवान् । श्रीभगवानुवाच । नैवेच्छत्याशिषः क्वापि ब्रह्मर्षिर्मो रि
क्षमप्युत । भक्तिं परां भगवति लब्धवान्पुरुषेऽव्यये । अथापि संवदिष्यामो भवान्येतेन १०

नसाधुना । अयं हि परमो लाभो नृणां साधुसमागमः । इत्युक्त्वा तमुपेयाय भगवान्स सतां प
तिः । ईशानः सर्वविद्यानामीश्वरः सर्वदेहिनां । न वेद रुद्धधीवृत्तिरात्मानं विश्वमेव च । भग
वांस्तदभिज्ञाय गिरिशो योगमायया । आविशत्तद्गुहाकाशं वायुश्छिद्रमिवेश्वरः । आत्मन्यपि
शिवं प्राप्तं तडित्पिंगजटाधरं । बिभ्राणं सहसा भातं विचक्ष्य हृदि विस्मितः । सायुधान्दश
भुजान्बिभ्राणं ध्यायता । किमिदं कुत एवेति समाधेर्विरतो मुनिः । नेत्रे उन्मील्य ददृशे सगणं
सोममागतं । रुद्रं त्रिलोकैकगुरुं ननाम शिरसा मुनिः । तस्मै सपर्यां व्यदधात्सगणाय सहो
मया । आह चात्मानुभावेन पूर्णकामस्य ते विभोः । करवाम किमीशान येनेदं निर्वृतं जगत् ।
नमः शिवाय शांताय सत्त्वाय प्रमृडाय च । रजोजुषेऽथ घोराय नमस्तुभ्यं तमोजुषे । एवं स्तुतः स
भगवानादिदेवः सतां गतिः । परितुष्टः प्रसन्नात्मा प्रहसंस्तमभाषत । श्रीशिव उवाच । वरं वृ
णीष्व नः कामं वरदेशा वयं त्रयः । अमोघं दर्शनं येषां मर्त्यो यद्विंदतेऽमृतं । ब्राह्मणाः साधवः
शांता निःसंगा भूतवत्सलाः । एकांतभक्ता अस्मासु निर्वैराः समदर्शिनः । एतादृशा ये
अस्माकं ब्रह्मविष्णुशिवानामेकांतभक्ता ब्राह्मणास्तान्सर्वे देवासुरमनुष्या वंदनादि कुर्वं

1२५
11(C)३

अथ

“ब्राह्मणजाति प्रशंसा”।

श्रीगजाननायनमः॥भागवते चतुर्थस्कंधे द्वाविंशतितमेध्याये पृथुमाहाराजवाक्यं। सेनापत्यं च राज्यं च दंडनेतृत्वमेव
च॥ सर्वलोकाधिपत्यं च वेदशास्त्रविदर्हति॥४५॥१॥ स्वमेव ब्राह्मणो भुंक्ते स्वं वस्ते स्वं ददाति च॥ तस्यैवानुग्रहे
णान्नं भुंजते क्षत्रियादयः॥४६॥२॥ एकविंशाध्याये पृथुवाक्यं। मा जातु तेजः प्रभवेन्महर्द्धिभिस्तितिक्षया तपसा विद्य
स्वयं या च॥ देदीप्यमानेऽजितदेवतानां कुलेराजकुलाद्द्विजानां॥३५॥३॥ यत्सेवया शेषगुहाशयः स्वराड्विप्रप्रियस्तु
ष्यति काममीश्वरः॥ तद्देव तद्धर्मपरैर्विनीतैः सर्वात्मना ब्रह्मकुलं [illegible] निषेव्यतां॥२८॥४॥ गुणायनं शील
धनं कृतज्ञं वृद्धाश्रयं संवृणुतेऽनु संपदः॥ प्रसीदतां ब्रह्मकुलं [illegible] गवां च जनार्दनः सानुचरश्च मह्यं॥४४॥५॥
सर्वत्रास्खलितो देशः सप्तद्वीपैकदंडधृक्॥ अन्यत्र ब्राह्मणकुलादन्यत्राच्युतगोत्रतः॥१२॥६॥ सप्तदशे॥ ब्रा
ह्मणप्रमुखान्वर्णान्भृत्यामात्यपुरोधसः। पौरान् जानपदान् श्रेणीः प्रकृतीः समपूजयत्॥२॥७॥ प्रहरंति न वै
स्त्रीषु कृतागस्स्वपि जंतवः॥ किमुत त्वद्विधा राजन् करुणा दीनवत्सलाः॥२०॥८॥ वेनोपाख्याने चतुर्दशेऽध्याये।
यज्ञेन युष्मद्विषये द्विजातिभिर्वितायमानेन सुराः कला हरेः॥ स्विष्टाः सुतुष्टाः प्रदिशंति वांछितं तद्धे
लनं नार्हसि वीर चेष्टितुं॥२२॥९॥ अहो उभयतः प्राप्तं लोकस्य व्यसनं महत्॥ दारुण्युभयतो दीप्ते

२ इव तस्करपालयोः ॥ ८ ॥ १० ॥ अथापि सांत्वयेमाभूं नास्मांस्तस्मात्तत्कंस्मरोतु ॥ तद्धि द्भिरसद्धृत्तो येनोस्मा
भिः कृतोन्तपः ॥ ११ ॥ ११ ॥ सांत्वितो यदि नो वाचं न गृह्णी ध्वस्य धर्मकृत् ॥ लोकधिक्कारसंदग्धं हंति ध्यामः स्वते
जसा ॥ १२ ॥ १२ ॥ ब्राह्मणः समदृक् शांतो दीनानां समुपेक्षकः ॥ यदि भेद इति शेषः । स्रवते ब्रह्म तस्यापि भिन्नभां
डात्पयो यथा ॥ १३ ॥ १३ ॥ ब्रह्मतपः । तृतीयस्कंधे षोडशोध्याये सनकादीन्प्रति भगवदुक्तिः । तद्वः प्रसादयाम्यद्य
ब्रह्मदैवं परं हि मे ॥ तद्धीत्यात्मकृतं मन्ये यत्स्वपुंभिरसत्कृताः ॥ ४ ॥ १४ ॥ यन्नामानि च गृह्णाति लोको भृत्ये कृतागसि ॥
सो साधुवाद सत्कीर्तिं हंति त्वचमिवामयः ॥ ५ ॥ १५ ॥ यस्यामृतामलयशःश्रवणावगाहः सद्यः पुनाति जगदाश्वपचा
द्विकुंठः ॥ सोहं भवद्भ्य उपलब्धसुतीर्थकीर्तिश्छिंद्यां स्वबाहुमपि वः प्रतिकूलवर्ति ॥ ६ ॥ १६ ॥ नाहं तथाद्मि यजमानह
विर्विताने श्च्योतद्घृतप्लुतमदन्कुतभुङ्मुखेन ॥ यद्ब्राह्मणस्य मुखतश्चरतोनुघासं तुष्टस्य मय्यवहितैर्निजकर्मपाकैः ॥ ७ ॥ १७
ये ब्राह्मणान्मयि धिया क्षिपतो र्चयंतस्तुष्यद्धृदः स्मितसुधोक्षितपद्मवक्त्राः ॥ वाण्यानुरागकलयात्मजवद्गृणंतः
संबोधयंत्यहमिवाहमुपाहृतास्तैः ॥ ८ ॥ १८ ॥ प्रश्नवैरू संवर्धयेद्विति क्रूरं करवर्जितानां कुर्यात्क्रिं द्विजवरैः सततं चित्त
ध्येत् ॥ अन्यायदंडनिरतस्य नृपापशीलो लोभी भवेत्सुकृपणो नृपतिर्मूर्खः ॥ ११ ॥

124
II(C) 3

२

क०उ० देशकालवस्तुपरिच्छेदरहितं चिन्मात्रस्वरूपं ग्राह्यं अग्राह्यमिति स्वस्वरूपव्यतिरिक्तं मायामनोबुद्धींद्रियगोचरजगत्स
२ त्यत्वचिंतनमग्राह्यं सत्यसंधइति सर्वधर्मान्परित्यज्य निर्ममो निरहंकारो भूत्वा ब्रह्मनिष्ठं शरणमधिगम्य तत्त्वमस्या
दिमहावाक्यार्थं निश्चित्य निर्विकल्पसमाधिना स्वतंत्रः सन्यश्चरति समुक्तः सपूज्यः सपरमहंसः सोवधूतः सब्रा
ह्मणः ससत्यसंधः ससर्ववित्सर्वविदिति कोवाब्राह्मणइति ब्रह्मवित्सएवब्राह्मणइति निरालंबोपनिषदं योधी
ते सब्रह्मभूत्वाभूत्वा नपुनरावर्त्तते नपुनरावर्त्तते इति यच्चैतन्यमनुस्यूतं जाग्रत्स्वप्नसुषुप्तिषु तदेवत्वंपरंत
त्वेमितोनास्त्यधिकंपरं सहनाववतु सहनौभुनक्तु सहवीर्यंकरवावहै तेजस्विनावधीतमस्तु माविद्विषावहै
॥ ॥ इतिनिरालंबोपनिषत्समाप्ता

७४

124/11 D

राम २

७४

श्रीगणेशायनमः निरालंबोपनिषत् सहनाववतु० वहे ॐशांतिःशांतिःशांतिः नमःशिवाय सच्चिदानंदमूर्तये नि 124/11(D)
ष्प्रपंचाय शांताय निरालंबाय तेजसे निरालंबं समाश्रित्य सालंबं विजहातियः ससन्यासी चयोगी चकैवल्यंपदमश्नुते २
येषामज्ञानजीवानां समस्तारिष्टशांतये यद्यद्बोद्धव्यमखिलं समाशंक्य ब्रवीम्यतः ३ किंब्रह्म किंशबलंब्रह्म कईश्वरः को
जीवः काप्रकृतिः कःपरमात्मा कोब्रह्माद्याः काजातिः किंकर्म किमकर्म किंतपः किमास्करं किंज्ञानं किमज्ञानं कःसंसा
रः कोबंधः कोमोक्षः किंसुखं किंदुःखं कःस्वर्गः कोनरकः किंपरमंपदं कउपास्यः कोविद्वान् कोमूढः कःसन्यासी किं
ग्राह्यं किमग्राह्यं कःसत्यसंधः इत्याशंक्याह ब्रह्मेतिच अखिलोपाधिविनिर्मुक्तमनाद्यंतं शुद्धं शांतं निर्गुणं निरवयवं निला
नंदमखंडैकरसमद्वितीयचैतन्यंब्रह्म किंशबलंब्रह्मेति अव्यक्तमहदहंकारपृथिव्यप्तेजोवाय्वाकाशात्मकत्वेन बृहद्रूपे
णांडकोशेन कर्मज्ञानार्थरूपतयाभासमानं सकलशक्त्युपबृंहितं शबलंब्रह्म कईश्वरइति एतल्लक्षणंब्रह्मैव स्वप्रकृति
शबलयोरभिन्नेशमाश्रित्य लोकान्सृष्ट्वांतर्यामित्वेन प्रविश्य ब्रह्मादीनांबुद्ध्यादींद्रियनियंतृत्वादीश्वरः जीवइतिच
ब्रह्मविष्ण्वीशेंद्रादिनामरूपद्वाराहमित्याध्यासवशात् स्थूलोजीवः सोयमेकोपिदेहारंभभेदवशात् बहुधाजीवाः प्र

नि०उ० शक्तिरिति ब्रह्मणः सकाशान्नानाविधजगद्विचित्रनिर्माणसामर्थ्यबुद्धिरूपा ब्रह्मशक्तिरेव प्रकृतिः परमात्मेति देहादेः पर
१ त्वाद्ब्रह्मैव परमात्मा के ब्रह्माद्या इति स ब्रह्म स शिवः सेंद्रः सोक्षरः स विष्णुः स रुद्रः स मनुः स सूर्यः स चंद्रः स सुराः
म सोप्यसुराः स मनुष्याः स पिशाचाः स जीवाः स स्त्रियः सोश्वादयः स ब्राह्मणादयः स एव सर्वमिदं ब्रह्म नेह नानास्ति किंच
न जातिरिति चर्मरक्तवसामांसमज्जास्थीनीत्युक्तानि च जातिरित्यात्मनो जातिव्यवहारोपि कल्पितः कर्मेति इंद्रियैः
क्रियमाणे नाहं करोमि कल्पितमित्यध्यात्मनिष्ठतया तत्कर्मैव कर्म अकर्मेति कर्तृत्वभोक्तृत्वाहंकारतया बंधस्वरू
पं जन्मादिकारणं नित्यनैमित्तिकं यागादिव्रततपोदानेषु फलानुसंधानमेतदकर्म तप इति ब्रह्म सत्यं जगन्मिथ्ये
त्यपरोक्षज्ञानात्क्षीणो ब्रह्माद्यैश्वर्याशासंकल्पबीजसंतापस्तपः आस्करमिति अत्युग्ररागद्वेषाहंकारोपेतहिंसा
दंभादियुक्तं तप आसुरं ज्ञानमिति एकादशेंद्रियनिग्रहेण सद्गुरूपासनया श्रवणमनननिदिध्यासेन दृग्दृश्यप्रका
विकार रं सर्वं निरस्य सर्वांतरस्थं घटपटादिपदार्थेषु चैतन्यं विना न किंचिदस्तीति साक्षात्कारानुभवज्ञानं ज्ञानं अज्ञानमिति राम
रज्जुसर्पज्ञानमिवाद्वितीये सर्वानुस्यूते सर्वमये ब्रह्मणि देवतिर्यक्स्थावरस्त्रीपुरुषवर्णाश्रमबंधमोक्षादिनानात्वक १

ल्पितज्ञानमज्ञानं संसार इति अनाद्यविद्यावासनया जातोहं मृतोहमित्यादिषड्भावविकारः संसारः बंध इति पितृमातृस
होदरदारापत्यगृहारामक्षेत्रवित्तादिममतासंसारार्णवसंकल्पो बंधः लज्जागुणसंशयादिसंकल्पो बंधः वर्णाश्रम
धर्मानुष्ठानसंकल्पोऽकामनादिसंकल्पो बंधः कर्तृत्वादिसंकल्पो बंधः देवमनुष्यादिरूपनानाकर्मसंबंधो बंधः यज्ञ ल्
ल् व्रतदाननानाकर्मसंबंधो बंधः यमाद्य[illegible]ष्टांगयोगाभ्याससंबंधो बंधः अणिमाद्यष्टैश्वर्यादिसिद्धिसंकल्पो बंधः केव ल्
ल् लमोक्षापेक्षसंबंधो बंधः संकल्पमात्रसंकल्पो बंधः मोक्ष इति नित्यानित्यवस्तुविचारादनित्यसंसारसंकल्पक्षयो
मोक्षः सुखमिति सच्चिदानंदरूपतया ज्ञात्वानंदावस्थामोक्षसुखं सुखं दुःखमिति अनात्मरूपविषयसंकल्प एव
दुःखं स्वर्ग इति सत्संगः स्वर्गः नरक इति असत्संसारविषयिजनसंसर्ग एव नरकः परंपदमिति प्राणेंद्रियांतःक
रणदेहादेः परतरं सच्चिदानंदमसंसारि सर्वसाक्षि सर्वगतं नित्यमुक्तब्रह्मस्वरूपं परमं पदं क उपास्य इति सर्वशरी
रस्थब्रह्मचैतन्यप्रापको गुरुरुपास्यः विद्वानिति सर्वांतरस्थं संविद्रूपं परमात्मानं वेत्ति स विद्वान् मूढ इति कर्तृ
त्वभोक्तृत्वाद्यहंकारभावनारूढो मूढः सन्यासीति स्वस्वरूपावस्थया सर्वकर्मफलत्यागी स सन्यासी[illegible] ग्राह्यमिति

124
11 E

बहुशोवधः ॥ घातनं यवनेंद्रस्य कुशस्थल्या निवेशनं ३६ आदानं पारिजातस्य सुधर्मायाः सुराल
यात् ॥ रुक्मिण्या हरणं युद्धे प्रमथ्य द्विषतो हरेः ३७ हरस्य जृंभणं युद्धे बाणस्य भुजकृंतनं ॥
प्राग्ज्योतिषपतिं हत्वा कन्यानां हरणं च यत् ३८ चैद्यपौंड्रकशाल्वानां दंतवक्रस्य दुर्मतेः ॥ शंबरो व
द्विविदः पीठो मुरः पंचजनादयः ३९ माहात्म्यं च वधस्तेषां वाराणस्याश्च दाहनं ॥ भारावत
रणं भूमेर्निमित्तीकृत्य पांडवान् ४० विप्रशापापदेशेन संहारः स्वकुलस्य च ॥ उद्धवस्य च संवादो
वासुदेवस्य चाद्भुतः ४१ यत्रात्मविद्या ह्यखिला प्रोक्ता धर्मविनिर्णयः ॥ ततो मर्त्यपरित्याग
आत्मयोगानुभावतः ४२ युगलक्षणवृत्तिश्च कलौ नृणामुपप्लवः ॥ चतुर्विधस्य प्रलय उत्प
त्तिस्त्रिविधा तथा ४३ देहत्यागश्च राजर्षेर्विष्णुदत्तस्य धीमतः ॥ शाखाप्रणयनमृषेर्मार्कंडेयस्य

३ सत्कथाः॥ महापुरुषविन्यासः सूर्यस्य जगदात्मनः ४४ इति चोक्तं द्विजश्रेष्ठाय यत्पृष्टोहमिहास्मि
वः॥ लीलावतार कर्माणि कीर्तितानीह सर्वतः ४५ पतितः स्खलितो वार्त्तः क्षुत्वा वा विवशो ब्रुवन्॥ हरये नमइ
त्युच्चैर्मुच्यते सर्वपातकात् ४६

अनुक्र॰ध्या॰ राणिकीर्तितान्यस्मरद्विषः॥ पूतनासुपयःपानंशकटोत्पाटनंशिशोः २८ तृणावर्त्तस्यनिष्पेषस्त
२ व थैवबकवत्सयोः॥ धेनुकस्यसहभ्रातुःप्रलंबस्यचसंक्षयः २९ गोपानांचपरित्राणंदावाग्नेःप
रिसर्पतः॥ दमनंकालियस्याहेर्महाहेर्नंदमोक्षणं ३० व्रतचर्यातुकन्यानांयत्रतुष्टोच्युतोव्रतैः
॥ प्रसादोयज्ञपत्नीभ्योविप्राणांचानुतापनं ३१ गोवर्धनोद्धारणंचशक्रस्यसुरभेरथ॥ यज्ञा
भिषेकंकृष्णस्यस्त्रीभिःक्रीडाचरात्रिषु ३२ शंखचूडस्यदुर्बुद्धेर्वधोरिष्टस्यकेशिनः॥ अक्रूरा
गमनंपश्चात्प्रस्थानंरामकृष्णयोः ३३ व्रजस्त्रीणांविलापश्चमथुरालोकनंततः॥ गजमुष्टिक
चाणूरकंसादीनांचयोवधः ३४ मृतस्यानयनंसूनोःपुनःसांदीपिनेर्गुरोः॥ मथुरायांनिवसता श्रीकृ॰ २
व यदुचक्रस्ययत्प्रियं ३५ कृतमुद्धवरामाभ्यांयुतेनहरिणाद्विजाः ३५ जरासंधसमानीतसैन्यस्य
त

124 / 11E

सू॰त॰अ॰१ नम२

श्रीगणेशायनमः॥ नमोधर्मायमहतेनमःकृष्णायवेधसे॥ ब्राह्मणेभ्योनमस्कृत्यधर्मान्वक्ष्येसनातनान् १
एतद्वःकथितंविप्राविष्णोश्चरितमद्भुतं॥ भवद्भिर्यदहंपृष्टोनराणांपुरुषोचितं २ अत्रसंकीर्तितःसाक्षा
त्सर्वपापहरोहरिः॥ नारायणोहृषीकेशोभगवान्सात्वतांपतिः ३ अत्रब्रह्मपरंगुह्यंजगतःप्रभवा
प्ययं॥ ज्ञानंचतदुपाख्यानंप्रोक्तंविज्ञानसंयुतं ४ भक्तियोगःसमाख्यातोवैराग्यंचतदाश्रयं॥ पा
रीक्षितमुपाख्यानंनारदाख्यानमेवच ५ प्रायोपवेशोराजर्षेर्विप्रशापात्परीक्षितः॥ शुकस्यचैवब्रह्म व
र्षेःसंवादश्चपरीक्षितः ६ योगधारणयोत्क्रांतिःसंवादोनारदाजयोः॥ अवतारानुगीतंचसर्गःप्राधानि
कोग्रतः ७ विदुरोद्धवसंवादःक्षत्तृमैत्रेययोस्ततः॥ पुराणसंहिताप्रश्नोमहापुरुषसंस्थितिः ८ त
तःप्राकृतिकःसर्गःसप्तवैकृतिकाश्चये॥ ततोब्रह्मांडसंभूतिर्वैराजःपुरुषोयतः ९ कालस्यस्थूलसू

क्षस्यगतिः पद्मसमुद्भवः ॥ भुवउद्धरणेंऽभोधो हिरण्याक्षवधोयथा १० ऊर्ध्वतिर्यगवाक् सर्गोरुद्रस
पुरा॰ भु॰ ध्या॰ र्गस्तथैवच ॥ अर्धनारीनरस्याथयतःस्वायंभुवोमनुः ११ शतरूपाचयास्त्रीणामाद्याप्रकृतिरुत्तमा ॥
१ संतानोधर्मपत्नीनां कर्दमस्यप्रजापतेः १२ अवतारोहिदेवस्यकपिलस्यमहात्मनः ॥ देवहूत्याश्च
संवादः कपिलेनचधीमता १३ नवब्रह्मसमुत्पत्तिर्दक्षयज्ञविनाशनं ॥ ध्रुवस्यचरितंपश्चात्पृथोः
प्राचीनबर्हिषः १४ नारदस्यचसंवादस्ततःप्रैयव्रतंद्विज ॥ नाभेस्ततोनुचरितमृषभस्यभरतस्य
च १५ ततोद्वीपसमुद्रादिवर्षनद्युपवर्णनं ॥ ज्योतिश्चक्रस्यसंस्थानंपातालनरकस्थितिः १६ द
क्षजन्मप्रचेतोभ्यस्तत्पुत्रीणांचसंततिः ॥ यतोदेवासुरनरास्तिर्यङ्नगखगादयः १७ त्वाष्ट्रस्यज
न्मनिधनंपुत्रयोश्चदितेर्द्विजाः ॥ दैत्येश्वरस्यचरितंप्रह्लादस्यमहात्मनः १८ मन्वंतरानुचरितं १

गजेंद्रस्यविमोक्षणं ॥ मन्वंतरावतारांश्चविष्णोर्हयशिरादयः १९ कौर्म्यमात्स्यंनारसिंहंवामनंच
नं जगत्पतेः ॥ क्षीरोदमथनंतद्वदमृतार्थेदिवौकसां २० देवासुरमहायुद्धंराजवंशानुकीर्तनं ॥ इक्ष्वाकुज
न्मतद्वंशेसुद्युम्नस्यमहात्मनः २१ इलोपाख्यानमत्रोक्तंतारोपाख्यानमेवच ॥ सूर्यवंशानुकथनं
शशादाद्यानृगादयः २२ सौकन्यंचाथशर्यातेःककुत्स्थस्यचधीमतः ॥ खट्वांगस्यचमांधातुःसौ
भरेःसगरस्यच २३ रामस्यकोशलेंद्रस्यचरितंकिल्बिषापहं ॥ निमेरंगपरित्यागोजनकानांचसं
भवः २४ रामस्यभार्गवेंद्रस्यनिःक्षत्रीकरणंभुवः ॥ ऐलस्यसोमवंशस्यययातेर्नहुषस्यच २५
दौष्यंतेर्भरतस्यापिशंतनोस्तत्सुतस्यच ॥ ययातेर्ज्येष्ठपुत्रस्ययदोर्वंशोनुकीर्तितः २६ यत्रावती
र्णोभगवान्कृष्णाख्योजगदीश्वरः ॥ वसुदेवगृहेजन्मततोवृद्धिश्चगोकुले २७ तस्यकर्माण्यपा

७७

+

॥ इति अनिरुद्धप्रणीतसांख्यसूत्रवृत्तिः समाप्ता ॥

+

ईश्वरः सर्वभूतानां हृद्देशेऽर्जुन तिष्ठति भ्रामयन्सर्वभूतानि यंत्रारूढानि मायया अहंकारकर्त्रधीना
कार्यसिद्धिर्नेश्वराधीना प्रमाणाभावात् प्रमाणाभावादिति जगदुपादानज्ञानाभावात् अव्यापकत्वादनेकेश्व
रकल्पनापि स्यात् कार्यत्वाच्चेतनकार्यत्वमप्यनैकांतिकमित्याह अदृष्टोद्भूतिवत्समानत्वं अदृष्टोद्भूतिवदकर्तृ
कत्वात्तस्यापि सकर्तृकत्वे दृष्टोद्भूत्यंतरस्य सहकारित्वे तस्याप्यन्यस्या अप्यन्यस्या इत्यनवस्था सादित्वाच्च
संसारस्य नानादित्वापरिहारः अहंकारस्य कारणत्वे किं महांतं प्रत्यपि कारणत्वमित्यत्राह महतोऽन्यत्
नच स्वकारणं कार्यं भवति स्वीया प्रकृतिः स्वामी पुरुषः तयोः संबंधः किं स्वाभाविक अन्यनिमित्तको
वा स्वाभाविकत्वे स्वाभावस्यानपायादनिर्मोक्ष इत्यत्राह कर्मनिमित्तः प्रकृतेः स्वस्वामिभावोऽप्यनादिबी
जांकुरवत् प्रकृतिरित्युपलक्षणं पुरुषस्येत्यपि द्रष्टव्यं कर्मणश्च स्वस्वामिसंबंधकारणत्वे विवेकात्क
र्मक्षये स्वस्वामिसंबंधान्मुक्तिः अनित्यत्वसादित्वात् नानादित्वापरिहारो नित्यस्य पुनरस्तीति अनादि
त्वेकं मतांतरमाह अविवेकनिमित्तो वा पंचशिखः स्वस्वामिभाववत्यनुवर्तते एकदेशिमतमा
ह लिंगशरीरनिमित्तक इति सनंदनाचार्यः लयवांल्लिंगमिति सूक्ष्ममाति वा हि कं शरीरं यावत्स्थू

सांख्य॰ लशरीरसूक्ष्मशरीरस्यागमनमनुभक्ति तावत्स्वस्वामिसंबंधाद्दुःख इत्युच्यते स्वमतमाह यद्वा तद्वा तदुच्छित्तिः
पुरुषार्थस्तदुच्छित्तिः पुरुषार्थ इति वीप्साऽध्यायपरिसमाप्तौ एवं सत्कार्यसिद्धांतः पूर्वमेव निरूपितः तंत्रतः
४६ प्रतिपाद्यत्वात्तर्हि स्यात्पुनरुक्तता इति कापिलसांख्यप्रवचनसूत्रवृत्तौ षष्ठोऽध्यायः समाप्तश्चायं ग्रंथः
वृत्तिकर्त्तानिरुद्धोऽभूत्सांख्यसूत्रस्य धीमतां मूढसत्वविवेकाय आसनश्चविमुक्तये इति सांख्यवृत्तिः स
माप्ता श्रीकृष्णार्पणमस्तु ॥ ॥ कृष्णः शरणं समस्तजगतां कृष्णं विना का गतिः कृष्णेन प्रतिहन्यते कलिम
लं कृष्णाय कार्यं नमः कृष्णात्त्रस्यति कालभीमभुजगः कृष्णस्य सर्वं वशे कृष्णे भक्तिरखंडिता भवतु मे कृ
ष्णत्वमेवाश्रयः श्रीकृष्णो जयति ॥ शाके १७३४ । ।अत्राध्यायानुक्रमणिकासमाप्तिपत्राणि ४६

सांख्य० नदर्पणेप्रतिबिंबितंमलिनमित्यभिमन्यतेविवेचकास्तुकैवल्यदर्शिनि आत्मनोऽपरिणामादसंगत्वाच्चकर्तृत्वादिकंमि
४५ थ्येतिपश्यतियदातुध्यानपरिपाककरुणाद्ध्रासनादाक्रमेणमनोलयाद्ध्रासनानाशाद्देहभंगेऽन्यदेहानुत्पादः तदाजी
वात्मनोपिपरमात्मास्तीहैकत्वेनव्यापकत्वात् कथंधर्माधर्मयोगः कर्तृत्वादिकंचाकिंवालिंगगोचरत्वेपरोक्षबोधानंदरूप
त्वमितिभण्यते अन्यथाप्रतिपादयितुमशक्यत्वादितिदेहोत्पत्तेः पूर्वंनिराशयत्वादधिष्ठानासंभवात् उत्पत्त्यनंतरम
माधिष्ठानमित्यत्राह अनधिष्ठितस्यपूतिभावयोगान्नतत्सिद्धिः व्यापकस्यनित्यस्यपूर्वपश्चाद्वानायोगाद्देहोत्प
त्तिसमकालमेवाधिष्ठानात् नतत्सिद्धिः नानाधिष्ठानसिद्धिः ततश्चपूतिभावइति अदृष्टवशादेवपूतिभावोनभ
निष्पत्तीत्यत्राह अदृष्टद्वाराचेदसंबद्धस्यतदसंभवाज्जलादिवदंकुरे निराश्रयस्यादृष्टस्यासामर्थ्याद्दिहासं
न बंधस्तेनैककार्यकारणंयथाजलस्यनांकुरजनकत्वं आदिशब्दाद्दृगग्रहणंकिमाश्रयाधर्मादयः कार्यजनका
इत्यत्राह निर्गुणत्वात्तदसंभवादहंकारधर्माह्येते निर्गुणत्वात्सदोनः तद्धर्मसंभवादेतेधर्मादयोहंकारधर्माःका
र्यकारणयोरभेदाद्बुद्धिधर्माइत्यर्थः किमात्मनःस्वरूपेणजीवत्वमन्यथावेत्यत्राह विशिष्टस्यजीवत्वमन्वयव्यति
रेकात् स्वरूपेणजीवत्वेकर्तृत्वात्भोक्तृत्वात् कौटस्थ्यहानिः अन्वयव्यतिरेकाच्चदेहावच्छेदेनवायुचंद्रि
संयोगादिंद्रियसंयोगेनविशिष्टस्यजीवत्वंऐश्वर्यशालित्वात् जीवात्मैवेश्वरःसएवजगन्निर्मास्यति तथाच ४५

त्वसिद्धो विमुक्तिश्रुतिः यथाप्रकृतेर्जगत्कारणत्वं व्यापकत्वात्मनः सर्वदेशोपभोगप्रसंग इत्यत्राह गतिश्रुतेश्चाव्यापकत्वेप्यु
पाधियोगाद्भोगदेशकाललाभो व्योमवत् यथा घटाद्युपाधियोगात् घटो गच्छति घटाकाशो गच्छतीति ज्ञानं तथा देहावि
च्छेदेन तद्गत्यात्मगतिरिति कर्मवशाद्यत्र देहे उपभोगस्तत्र देहगमनादात्मनो भोगलाभः यथात्माव्यापकः चिद्रूपः स
र्वदा सर्वत्र सर्वार्थेषु सर्वार्थेषु समकालं ज्ञानं प्रसज्येत न चैवं दृश्यते तन्न भवेदेवं यथात्माव्यापकः स्वरूपेण वृत्तिज्ञानं ज
नयति न चैवं किंतु देहादिपरिच्छिन्न एव यथा सूर्यः प्रकाशस्वभावोपि मेरोर्दक्षिणस्थो नोत्तरभागं प्रकाशयति उत्तरस्थो
न दक्षिणभागं अव्यापकत्वात् यदा तु ज्ञानादिना दग्धकर्माशयत्वेन दृष्टदेहादिसंहारो नीरजस्तमस्को व्यापको भवति म
न तदा वृत्तिज्ञानं जनयत्यविकारित्वात् किंतु स्वयमेव जगत्प्रकाशस्वभावः यथा चाकाशं व्यापकं प्रादेशिकधूमादि
संबंधेन न मलिनं भवति किंतु घटाद्यवच्छिन्नं सत् घटस्थकर्दरचौर्तिसर्वमालिन्यमित्यनुमन्यते तत्रापि नाकाशं मलिनं त
स्य लेपाभावात् किंतु अविवेचकानां मिथ्याभिमानमात्रं घटभंगे तथाऽदर्शनात् तथात्माव्यापकोनास्य धर्मादिसं
बंधो नापि ज्ञानं किंतु शरीरावच्छेदेन मरुद्वृद्धियोगाद्बीजसंबंधेन मनोयोगाज्जीवात्मा इत्युच्यते मनसाविनाभूता प्रकृ
तिरिति प्राकृत धर्माधर्मज्ञानाज्ञानसुखदुःखबद्धाहंकारादियतद्विषजन्मादिमानिव लक्ष्यते साक्षिकाशेन प्रकृतेः स्वच्छ
त्वात् तत्प्रतिबिंबित आत्मा प्रकृतिकर्तृत्वादिकमात्मन्यभिमन्यते मिथ्याभिमानोपि प्रकृतिप्रतिबिंबिते आत्मनि न
गत्वात्मनि यथा निष्कंपोपि चंद्रो जलप्रतिबिंबितो जलकंपात् कंपत इति मिथ्याप्रत्ययः यथा वा मुखं निर्मलमपि मलि

गुणः प्लक्षद्वीपः तद्वेष्टनेन तत्तुल्यो दुग्धाससमुद्रः तद्वेष्टनेन तद्द्विगुणः पुष्करद्वीपः तद्वेष्टनेन तत्तुल्यः स्वादूदकसमुद्रः लो
कालोकपर्वतवेष्टनेन ब्रह्माण्डकटाहेन सर्वत्र वर्तते जगदिति पूर्वोक्तमपि शिष्यहितं तत्त्वं यत्पुनः प्रतिपादयति प्रका
रान्तरासंभवात्तद्दूषयति प्रकारान्तरं च पूर्वमेव दूषितं अहं करोमीति प्रत्यक्षात् किं महंकारः कर्ता अथाहंकारशब्देनात्मो
४४ च्यते सर्वस्य कर्तेत्यत्राह अहंकारः कर्ता न पुरुषः पुरुषस्यापरिणामित्वात् कृतिचैतन्ययोः सामानाधिकरण्यं च व
क्षस्तिष्टतीत्यादौ व्यभिचरति एकर्मक्षये पियावद्देहभावित्वात्कर्मणः परापरकर्मोत्पत्त्या च निर्मोक्ष इत्यत्राह चिदव
सानाद्भुक्तिस्तत्कर्मार्जितत्वात् अविवेकात्कर्मार्जनं तेन च मुक्तिरिति चिदवसानादासज्ज्ञानविचारबलाद्विवेकोत्पत्तौ
कापरकर्मार्जनं तदभावात्कोपभोः कृतकर्मणो ज्ञानादेव नाशः तथा च यथैधांसि समिद्धोऽग्निर्भस्मसात्कुरुतेऽर्जुन ज्ञा
नाग्निः सर्वकर्माणि भस्मसात्कुरुते तथेति अतिशयत्वाच्चंद्रादिलोकप्राप्तिरेव पुरुषार्थो भविष्यतीत्यत्राह चंद्रादि
लोकेप्यावृत्तिर्निमित्तसंभवात् आदिशब्दाद्ब्रह्मलोकादयो ग्राह्याः गुरूपसंपन्नस्य शास्त्रश्रवणादेव मोक्षो भविष्य
तीति किं मननादिनेत्यत्राह लोकस्य नोपदेशात्तत्सिद्धिः पूर्ववत् पूर्वोक्तमेवोक्तं मंदानां न श्रवणमात्रान्मुक्तिः किं ४४
तु मननादिना अन्नेन यमनियमासनप्राणायामप्रत्याहारधारणाध्यानसमाधय उपलक्षणीयाः कथं तर्हि पदे
श्रामात्रान्मुक्तिः श्रूयत इत्यत्राह पारंपर्येण तत्सिद्धौ विमुक्तिश्रुतिः प्रथमभावित्वाच्छ्रवणस्य पारंपर्येण कारण

कोपभोगो निमित्ताभावाच्च भवेदेवं यद्यन्यस्य प्रधानस्योपसर्पणमात्रमुपभोगनिमित्तं स्यात् न चैवं किंतु भोग्य
निमित्तमुपभोगः स च मोक्षे नास्तीति एक एवात्मा तथा च एकमेव परं ब्रह्म सत्यमन्यद्विकल्पितं को मोहः कः शोक
एकत्वमनुपश्यतः एतदपाकरोति पुरुषबहुत्वं व्यवस्थातः एतत्प्रथमाध्याये जन्मादिसूत्रे वर्णितं तथा च अ
जामेकां लोहितशुक्लकृष्णां बह्वीः प्रजाः सृजमानां सरूपाः अजो ह्येको जुषमाणोऽनुशेते जहात्येनां भुक्तभोगामजो
न्यः उपाधिभेदात्तन्नानात्वं भविष्यतीत्यत्राह उपाधिश्चेत्तत्सिद्धौ पुनर्द्वैतं तत्सिद्धौ भेदसिद्धौ उपाधिमिथ्यात्वे कुतो
भेदसिद्धिः सत्यत्वं तु तेनैव पुनर्द्वैतं दूषणान्तरमाह द्वाभ्यामपि प्रमाणविरोधः सत्यासत्याभ्यां सत्यत्वे द्वैतसिद्ध्या
तहानिः असत्यत्वे कुतो नानात्वव्यवस्था नाद्वैतश्रुतिविरोधो द्वैतहानिश्चेत्याह द्वाभ्यामप्यविरोधान्न पूर्वमु
त्तरं च साधकाभावात् अद्वैतश्रुतेः सामान्यपरत्वात् प्रशंसापरत्वाद्वाऽन्यार्थत्वेन न विरोधः तस्मान्न पूर्वमात्मै
कत्वं नोत्तरं च श्रुतिविरोधः अद्वैतत्वे प्रमाणासत्त्वात् न तत्सिद्धिरिति भिन्नोऽस्तीत्यर्थः ननु स्वप्रकाशतयात्मासि
स्यति तत्राह प्रकाशतस्तत्सिद्धौ कर्मकर्तृविरोधात् चैतन्यरूपप्रकाशात्मश्चैतन्यसिद्धौ कर्मकर्तृविरोध इत्यर्थः
प्रकाश्यप्रकाशसंबंधे हि प्रकाशनमालोकादिषु दृष्टं स्वस्य साक्षात् स्वस्मिन्संबंधश्च विरुद्धः घटाद्यप्रमित्या
दितादात्म्यसंबंधेऽपि संबंधितावच्छेदकभेदात्संबंधिनोस्त्येव भेद इति अस्मन्मते तु बुद्धिसत्त्वाख्यप्रमाणागो

कारात्तद्द्वाराप्रतिबिंबरूपस्य स्वस्य बिंबरूपे स्वस्मिन्संबंधो घटते यथा सूर्ये जलद्वाराप्रतिबिंबरूपस्य संबंध इति
स्वप्रकाशत्वक्षतिस्तु नान्यौपाधिकप्रकाशाद्विपरावबोधस्यो न प्रमाणाभावः स्वप्रकाशमिव प्रमाण
भावः औसनः स्वप्रकाशायति चिद्रूपः जडदन्यच्चिद्रूपो जडं प्रकाशयति जडव्यावृत्तत्वेन प्रकाशरूपत्व
मस्तीत्यत आह जडव्यावृत्तो जडं प्रकाशयति नेति नेतीति उच्यते ननु चिद्रूपसुखतया हि अथालौकिकप्रकाशरूपत्वं तन्न
नतुप्रकाशधर्मत्वमुक्तं अतएव सएष नेति दृष्टांताभावः अथ योगिगम्यं तदसंप्रज्ञातयोगिनो ज्ञानचेष्टाभावाल्लिंगं नास्ति संप्रज्ञातयोगि
व्याप्तिग्रहणाभावात् तेन च लौकिक एवासानुमीयते तेन सोप्यनुभवरूपश्चैतन्यं प्रतिपादयितुं शक्तोति तथा च
नश्वरमचेष्टादिलिंगं इक्षुक्षीरगुडादीनां माधुर्यस्यांतरं महत् तथापि न तदाख्यातुं सरस्वत्यापि शक्यते एवमचेतनस्याव्यावृत्तत्वात् चेतन
इत्युच्यते ननु चितिचितिसमवायश्चैतन्यरूपत्वं वा असंप्रज्ञातावस्थायां निरुद्धवृत्तित्वेनाप्यलौकिकचैतन्य
मितिव्यवहारादन्यथासिद्धेः संप्रज्ञातावस्थायां तु वृत्तिज्ञानेनैव चैतन्यमिति व्यपदेशः एवं दुःखनिवृत्तावानंदस्व
पत्वमिति प्रयोगः यद्भावात्मकमानंदरूपत्वं तत्किं सुखमात्रे प्रयोगः तथा सत्य ज्ञानस्यैव सुखस्यादर्शनात्तु
सुखं तत्र ज्ञानं ज्ञानाच्चेति कुतोऽद्वैतं अथ सुखविशेषे आनंदव्यपदेशः सुखं च चैतन्यरूपं चेति न दृष्टं सुखि
वेचकानामेवैतत् विवेचकास्त्वेवमन्यं तत एव दृष्टेनैव व्यावृत्तिरूपेणैवोपपत्तेर्विशेषाः शब्दकारण न तुत्र

याणां संयोगादतिरिक्तं किंचिदस्ति तथापां च भौतिकत्वाद्विशेषेपि जंतुरूपेण परिणतानां पिंडानां तथाविधासं
बंधाच्चैतन्यमिति स्वप्रकाशत्वे चासनोप्यंशो जडत्वमिति एवं च स्वप्रकाशक्षतिर्बाधितास्यादित्यत आह नश्वति
विरोधो रागिणां वैराग्याय तत्सिद्धेः जगतस्त्रिगुणात्मकत्वे रागहेतुत्वात् समाणादयश्च त्रिगुणत्वेन हेया इति रागो
च्छित्तिश्च कर्तव्येति तत्सिद्धेः स्वप्रकाशक्षते न्यायासिद्धेः जगतो मिथ्यात्वात्कथमन्यथासिद्धिरित्यत आह जग
त्सत्यत्वमदृष्टकारणजन्यत्वाद्बाधकाभावात् संक्षेपाज्जगदुच्यते ऊर्द्ध्वं भूर्भुवः स्वर्महः जनस्तपः सत्यमिति अ
धो महीतलरसातलतलातलपातालसुतलवितला तलाइति मध्ये जंबुद्वीपस्तन्मध्ये सुमेरुः तत्पूर्वादिचतुर्दिक्षु
मंदरगंधमादनविपुलसुपार्श्वनामानो विष्कंभपर्वताः मेरुदक्षिणे भारतवर्षहिमालयपर्वतकिंपुरुषवर्षहे
मकूटपर्वतहरिवर्षनिषधपर्वताः मेरोरुत्तरे कुरुवर्षश्रृंगीपर्वतहिरण्यकवर्षश्वेतपर्वतरम्यकवर्षनीलपर्वताः
मेरुपूर्वे भद्राश्ववर्षमाल्यवतपर्वतः मेरुपश्चिमे केतुमालवर्षगंधमादनपर्वतः मेरोरधः इलावृतवर्षः लक्ष
योजनो जंबूद्वीपः तद्वेष्टनेन तत्तुल्यो लवणसमुद्रः तद्वेष्टनेन तद्द्विगुणः शाकद्वीपः तद्वेष्टनेन तत्तुल्य इक्षुरस
समुद्रः तद्वेष्टनेन तद्द्विगुणः कुशद्वीपः तद्वेष्टनेन तत्तुल्यः सुरासमुद्रः तद्वेष्टनेन तद्द्विगुणः क्रौंचद्वीपः तद्वेष्ट
नेन तत्तुल्यो घृतसमुद्रः तद्वेष्टनेन तद्द्विगुणः शाल्मलिद्वीपः तद्वेष्टनेन तत्तुल्यो दधिसमुद्रः तद्वेष्टनेन तद्द्वि

सांख्य० न कुतर्कापसदस्यात्मलाभः व्यक्तं तन्मात्राणां महाभूतकार्यत्वदर्शनात् कथं प्रकृतेः कारणत्वमित्यत आह
पारंपर्येपि प्रधानुवृत्तिरणुवत् यथा घटादेः मृत्पिंडकार्यत्वेपि परंपर्येण परमाणूपादानत्वं तथात्रापीति प्रकृ
तिर्व्यापिका न वेत्यत आह सर्वत्र कार्यदर्शनाद्विभुत्वं स्पष्टं विपक्षे दोषमाह गतियोगेप्याद्यकारणताहानिरणुवत्
४२ गतिः क्रिया तद्योगो यस्यास्ति तदव्यापकं प्रकृतेर्गतिमत्त्वे कार्यत्वं परमाणुवत् न त्वाद्यकारणता प्रकृतेरुपादाने
द्रव्यस्योपादानत्वात्तदंतर्भावः स्यादित्यत आह प्रसिद्धाधिक्यं प्रधानस्य न नियमः प्रसिद्धेभ्यो द्रव्येभ्योऽधिकं प्रध
नान्यत्वात् तदार्थस्य उपादानकारणता च न समवायिकारणता किंतु वैशेषिकसमवायस्यानभ्युपगमात् प्रकृ
तिः किं गुणात्मिका गुणधर्मिणी वेत्यत आह सत्वादीनामतद्धर्मत्वं तद्रूत् तादात्म्यादुपभोगार्थं प्रवृत्तिर्दृष्टा न तु
जडस्योपभोग इत्यत आह अनुपभोगेपि पुमर्थं सृष्टिः प्रधानस्योष्ट्रकुंकुमवहनवत् कृतव्याख्यानमेतत् तृ
तीयेध्याये प्रधानेत्यादिसूत्रे प्रकृतेरकर्तृत्वे कथं सृष्टिवैचित्र्यमित्यत आह साम्यवैषम्याभ्यां कार्यद्वयं साम्यात् ५२
प्रकृतेः सदृशपरिणामात् प्रलयः वैषम्यात्प्रकृतेर्महदादिभावेन विसदृशपरिणामात्सृष्टिः प्रलयमाह
विमुक्तबोधान्न सृष्टिः प्रधानस्य लोकवत् यथा लोके बंधमोक्षार्थं यतते मुक्तबंधस्तु कृतार्थत्वात्तदास्ते तथा
प्रधानमपि व्यापकत्वात्प्रकृतिपुरुषयोः संबंधोऽस्त्येवेति मोक्षेपि भोगप्रसंग इत्यत आह नान्योपसर्पणेपि मु

वदिति विशेषगुणोच्छित्तिर्मुक्तिरित्यत आह निर्गुणत्वमात्मनोऽसंगादिश्रुतेः विशेषगुणनिषेधात् सामान्यगुणस्वी
कारः तथा चासंगादिश्रुतिविरोधः स्यात् यद्यसंगः पुरुषः कथं धर्मात्स्वर्गोऽधर्मान्नरक इति तत्राह परधर्मत्वेपि तत्
सिद्धिरविवेकात् प्रकृतिधर्मत्वेपि प्रकृतिपुरुषाविवेकात्तच्छायापत्त्यात्मनः स्वर्गादिप्राप्तिरित्यभिमानः अविवेकः
किं सादिरनादिर्वेत्यत आह अनादिरविवेकोऽन्यथा दोषद्वयप्रसक्तेः यदि सादिरविवेको भवेत् तदुत्पत्तेः मोक्षः स्यात्
ध तदुत्पत्तौ च बंध इति मुक्तस्य बंध इत्येको दोषः अविवेकप्रागभावस्यापि विद्यमानत्वान्मुक्तिसिद्धौ अविवेक
नाशार्थमनुष्ठानं व्यर्थमिति द्वितीयो दोषः अविवेकोऽनादित्वात्किं नित्योऽनित्यो वेत्यत आह न नित्यः स्यादात्मवद
न्यथानुच्छित्तिः नित्यो द्विधा कूटस्थनित्य आत्मा परिणामिनित्या प्रकृतिः नैतद्द्वयमप्यविवेकः किंत्वनित्य एव नाशात्
अन्यथा नित्यत्वेऽनुच्छित्तिः आत्मवदित्युपलक्षणं प्रकृतिवदित्यपि द्रष्टव्यं अविवेकनाशः केनेत्यत आह प्रतिनि
यतकारणनाश्यत्वमस्य ध्वांतवत् यथा ध्वांतस्य नाशकः प्रकाश इति अत्र को नाशक इत्यत आह अत्रापि प्रति
नियमोऽन्वयव्यतिरेकात् अव्यभिचाराद्विवेक एव नाशक इति किमविवेकादृते आत्मा अथान्यदपि बंधका
रणमस्तीत्यत आह प्रकारांतरासंभवादविवेक एव बंधः व्यक्तं मुक्तेः कार्यत्वान्नाशे पुनर्बंधः इत्यत आह न मुक्तस्य
पुनर्बंधयोगोप्यनावृत्तिश्रुतेः श्रुतिश्च आत्मा ज्ञातव्यः प्रकृतितो विवेक्तव्यो न पुनरावर्तत इति न्यायमश्च

भावकार्यस्य नाशात् दुःखनिवृत्तिः स्याद्भावरूपेति विपक्षे दोषमाह पुरुषार्थत्वमन्यथा पुनर्बंधकः पुरुषार्थः दूषणां
तरमाह अविशेषापत्तिरुभयोः संसारिमुक्तयोर्बंधयोगाविशेषाद्व्याध्यादयो योगांतरायाः तथा च पतंजलिः व्याधि
स्त्यान संशयप्रमादालस्याविरतिभ्रांतिदर्शनालब्धभूमिकत्वानवस्थितत्वानि चित्तविक्षेपास्तेंऽतरायाः व्याधिर्ज
रादिः स्त्यानमकर्मण्यता संशयो भयकोटिस्पृग्ज्ञानं प्रमादः समाधावनवधानं आलस्यं कायगुरुत्वं विरतिर्विषय
तृष्णा भ्रांतिदर्शनं मिथ्याज्ञानं अलब्धभूमिकत्वं समाधिभूमेरलाभः अनवस्थितत्वं लब्धभूमेर्मनसि भ्रंशित्वं किं
मेवां ध्वंसमात्रं धर्मांतरप्राप्तिर्वेत्यत आह मुक्तिरंतरायध्वस्तेर्न परः धर्मांतरपक्षे कूटस्थत्वप्रच्यवइसुपगम्याथा
ह तत्राप्यविरोधः भवतु धर्मयोगस्तथापि न काचित्क्षतिः मुक्तावनावृत्तिरुक्ता सा धर्मांतरयोगेऽप्यस्तीति श्रवण
मनननिदिध्यासनं किं सर्वपुरुषसाधारणं नेत्यत आह अधिकारित्रैविध्यान्न नियमः त्रिविधास्त्वधिकारिणो म
दुमध्याधिमात्राः अधिमात्रस्य श्रवणमात्रान्मुक्तिः मध्यमस्य द्वाभ्यां मंदस्य त्रिभिः न सर्वं सर्वस्येत्यप
क्षांतरमाह दार्ढ्यार्थमुत्तरेषां उत्तरेषां मंदानां दार्ढ्यार्थं साधनत्रयमुक्तं श्रुतिरपि आत्मा वारे द्रष्टव्यः श्रोत
व्यो मंतव्यो निदिध्यासितव्यश्चेति स्वस्तिकानां मध्ये किमासनमनुष्ठेयमित्यत आह स्थिरसुखमासनमिति
न नियमः स्थैर्यार्थं सुखार्थं वासनानुष्ठानं तदेवासनं व्यापकत्वादिति एकाग्रतया विषयचिंतनं ध्यानं न नि ४९

र्विषयस्य वासनो ध्यानमित्यत आह ध्यानं निर्विषयं मनः समाधावत्र ध्यानशब्द इति वृत्तिनिरोधतुल्यत्वे सुषुप्तिसमाध्योः
को विशेष इत्यत आह उभयथाप्यविशेषश्चेन्नैवमुपरागनिरोधाद्विशेषः उपरागो विषयवासना तन्निरोधः समाधा
विति शेषः निःसंगत्वादात्मनः उपरागाभावात् सर्वदा मुक्तिरित्यत आह निःसंगेऽप्युपरागोऽविवेकात् प्रकृतिपुरुषा
विवेकात् प्रकृत्युपरागेणात्मनोपराग इत्यभिमानः उपरागोऽपि न वास्तविक इत्यत आह जपास्फटिकयोपरागः किं
त्वभिमानः तयोः संसर्गादुपरागो युक्तः आत्मनस्त्वसंसर्गान्नोपरागः किंत्वभिमानः आत्मन्यहंकाराध्यासादुपरागा
ध्यासः कथमभिमाननाश इत्यत आह ध्यानधारणाभ्यासवैराग्यादिभिस्तन्निरोधः आदिशब्दात्समाधिग्रहणं एक
देशिमतमुक्त्वा स्वमतमाह लयविक्षेपयोर्व्यावृत्त्येत्याचार्याः लयः सुषुप्तिर्विक्षेपो जागरितं तयोर्व्यावृत्त्याहंमानादि
नाशः गुहादिस्थानेषु केषु ध्यानादयः कर्तव्या इत्यत आह न स्थाननियमश्चित्तप्रसादाभावात् यत्र चित्तप्रसादस्त
भवति तत्र कर्तव्यमनुष्ठानं अहंकारादीनामुपादानमस्त्वकृतं प्रकृत्येत्यत आह प्रकृतेराद्योपादानता अन्येषां का
र्यत्वश्रुतेः अहंकारादीनां कार्यत्वश्रुतेः तेषामपि कारणं प्रकृतिरित्यस्य कदाचिदितं प्रकृतिपुरुषयोः पूर्वकालभा
वित्वे कः कारणमित्यत आह नित्यत्वेऽपि नात्मनो योग्यत्वाभावात् गुणवत्त्वसंसर्गित्वे कारणयोग्यता सा चात्म
नि नास्तीति प्रकृतिः कारणं आत्मनश्चेतनत्वाज्ञोक्तृत्वादियुज्यते न च तस्य प्रधानत्वेत्यत आह श्रुतिविरोधा

सांख्य० सामान्येनात्मन्यविप्रतिपत्तिर्विशेषनिरूपणमाह देवादिव्यतिरिक्तोसौ वैचित्र्यात् देहाभेदपक्षेबाल्यकौमारयौव
नवार्द्धकदेहाभेदादनेकात्मचप्रसंगः मृतेदेहेनाशात्कस्यापिजन्मांतरवैचित्र्यानु देहाभेदपक्षेवापपत्तिः श्रु
तिश्च अपाणिपादोजवनोग्रहीतापश्यत्यचक्षुः सशृणोत्यकर्णः सवेत्तिसर्वंनहितस्यवेत्तातमाहुरग्र्यंपुरुषंपु
४० राणं हेत्वंतरमाह षष्ठीव्यपदेशादपि ममदेहइतिज्ञानमस्तिभेदेचषष्ठीश्रूयते स्थूलोहमितिसामानाधिकरण्य
ज्ञानमस्तिचेत् नदेहेप्रत्यक्षभोगात्तन्निमित्तोयंगौणः प्रत्ययः शिलापुत्रस्यशरीरमित्यभेदेपिषष्ठीश्रुतेर्नभेद
इत्यत्राह नशिलापुत्रवद्धर्मिग्राहकमानबाधात् नतत्रप्रत्यक्षेणवाभेदप्रतीतेः षष्ठीबाधितेतिगौणःप्रयोगः
मुख्यसंभवात् गौणोत्रनास्ति सुखोत्तथापुनरावृत्तेः सुखाभावस्यापिविद्यमानत्वात् अपुरुषार्थत्वमित्यत्राह
यथादुःखक्लेशः पुरुषस्यनतथासुखादभिलाषः सुखेदुःखस्यावश्यंभावात् यदिसुखेसतिदुःखमवश्यंभ
वेत् कःसुखमभिलषेत् तस्माद्दुःखबहुलत्वाद्दुःखनिवृत्तिरेवपुरुषार्थः सुखस्यहेयत्वमाह कुत्रापिकोपिसु
खीति स्वयमेवचिंतयतांप्रत्यक्षमेववानितादीनांसुखहेतुत्वमित्यत्राह तदपिदुःखशबलमितिदुःखपक्षेनि ४०
क्षिपंतेविवेचकाः स्रगादीनामर्जनेक्षयादौचदुःखमिति स्वसंवेदनमेवप्रमाणमितिदुःखमेवपरमपुरुषार्थे
नत्वभावइत्यत्राह सुखलाभाभावादपुरुषार्थमितिचेन्नद्वैविध्यात् रागिणांसुखंवीतरागाणांदुःखाभा

वे आत्माधिष्ठानं आत्माधिष्ठितेनवादेहनिष्पत्तिरितिनिर्णयमाह भोक्तुरधिष्ठानाद्भोगायतननिर्माणमन्यथापूतिभा
वप्रसक्तेः स्फुटं प्रधानमलत्वाच्छरीरस्यतद्द्वारेणवाधिष्ठानंभविष्यतीत्यत्राह भृत्यद्वारास्वाम्यधिष्ठितिर्नैकांतात् ज
डेभ्यःस्ववर्णितेनसर्वत्रस्वस्थितिः यथातथाजडस्यप्रधानस्याधिष्ठानान्नपूतिभावविरोधः ब्रह्मरूपनिरूपणायान्ये
षांतुल्यरूपमाह समाधिसुषुप्तिमोक्षेषुब्रह्मरूपता समाधिरसंप्रज्ञातावस्थासुषुप्तिश्चात्रसमग्रसुषुप्तिः मोक्षश्च
विदेहकैवल्यमात्रयस्त्रासुपुरुषाणांब्रह्मताबुद्धिवृत्तिविलयतस्तदौपाधिकपरिच्छेदादिगमनेनस्वस्वरूपपूर्णतया
वस्थानं यथाघटध्वंसेघटाकाशस्यपूर्णताइत्यर्थः तर्हिकः समाधिसुषुप्तिभ्यांमोक्षस्यविशेषस्तत्राह द्वयोःस
बीजत्वमन्यस्यतद्धतिः द्वयोःसमाधिसुषुप्त्योःसबीजत्वंसंस्कारवत्वं अन्यस्यमोक्षस्यबीजहानंसमाधिसुषुप्ति
दृष्टानिरुद्धवृत्तिकत्वात्कृतकस्यतानतुमोक्षेसत्यत्राह द्वयोरिवत्रयस्यापिदृष्टत्वान्नतुद्वौ त्रयस्यापिमोक्षस्या
पिदृष्टत्वाच्छ्रुतानुमानप्रतिपादनात् कृतकत्वता नतुद्वौसुषुप्तिसमाधीसबीजत्वात्तयोः कृतकत्वतागौणीति
रागादीनांबंधहेतुत्वात्किंवासनयेत्यत्राह वासनयानर्थख्यापनंदोषयोगेपिननिमित्तस्यप्रधानबाधकत्वं
नदोषादेवबंधइतिवक्तव्यं वासनयानर्थख्यापनमयस्य कर्तव्यंदोषाणामेवनिमित्तस्यप्रधानस्यमुक्तोबाध
कत्वं वक्तव्यमुख्यंचवासनेति इच्छादिक्षेपेवेगाख्यात्संस्कारात्कर्मणाचसंस्काराइत्यनेकसंस्कारान् निरस्यति

एकः संस्कारः क्रियानिवर्तको न तु प्रतिक्रियं संस्कारभेदाः बहुकल्पनाप्रसक्तेः एकसंस्कारपक्षे इषोर्निपातइ
त्यंक परिणामपक्षे च एकस्यैवानानापरिणामास्युरिति बहुकल्पनायां गौरवमिति एको विषयः यत एकाबुद्धिः

सत्सदिति प्रत्ययस्याविशेषाद्भिद्यु आह नाबाह्यबुद्धिनियमः यथा सदिति प्रत्ययश्च सामान्यविषयस्तस्मान्न बाह्य
बुद्धौ विवेकस्यैवेति नियमः पांचभौतिकं जीवशरीरं कति भूताद्यैः स्थावरक्रियस्तु आह वृक्षगुल्मलतौषधिव
नस्पतितृणवीरुधादीनां अपि भोक्तृभोगायतनत्वं पूर्ववत् पूर्ववदिति भोगायतनत्वे च जन्मांतरक्रियाविशेषात्
जीवात्मन एव स्थावराश्रयतामुपगच्छंतीति श्रुतेः अतः स्मृतिरप्यस्तीत्याह स्मृतेश्च व्यक्तं तथा च अवादितेऽयौवि भि
प्र आशिषं न प्रयच्छति श्मशाने जायते वृक्षो गृध्रकंकनिषेवितः शरीरजैः कर्मदोषैर्याति स्थावरतां नरः वाचिकैः
पक्षिमृगतां मानसैरंत्यजातितां वृक्षादीनां देहत्वे कर्माधिकारिता स्यादित्यत आह न देहमात्रतः कर्माधिकारित्वं
वैशिष्ट्यश्रुतेः जीवद्देहा अपि चांडालादयो न कर्माधिकारिणः किंपुनः स्थावरा इति विशिष्टदेहस्य कर्माधि
कारित्वात् देहभेदमाह त्रिधा त्रयाणां व्यवस्था कर्मदेहोपभोगदेहोभयदेहाः वीतरागाणां फलन्यासेन कर्मक
रणात् कर्मदेहः पश्वादीनामुपभोगदेहः भोगिनां कर्माधिकारिणां कर्मोपभोगदेहः चतुर्थमधिकारिणं
देहमाह न किंचिदप्यनुशयिनः विचादनुशयं द्वेषः पश्चात्तापानुबंधयोः शाश्वतः अनुशयिनो योगिनो

नाकिंचिदपि सर्वानधिकारात् नित्यां बुद्धिं निराकरोति न बुद्ध्यादिनित्यत्वमाश्रयविशेषेपि वह्निवत् व्याप्तत्व
पस्य व्यभिचारे सर्वनानाश्वासः तथा चाश्रयविशेषे चंदनप्रभवस्य वन्हेरनुष्णत्वं स्यात् दूषणांतरमाह आ
श्रयासिद्धेश्च ईश्वरस्यासत्वात् तन्नां च धर्माभावात् प्रकृतिधर्माणां परिणामित्वात् महदादीनामनित्यत्वात् न
चानित्याश्रया धर्मा नित्या भवितुमर्हंति तस्मान्नित्यबुद्धेराश्रयो नास्ति मणिमंत्रौषधितपःप्रभावात् सिद्धिर्दृष्टा न
तु योगसिद्ध्या दृष्टा इत्यत आह योगसिद्धयोप्यौषधादिसिद्धिवन्नापलपनीयाः अणिमादिसिद्धिः कायव्यूहप
रपुरप्रवेशादयो दृष्टस्ते च मंत्रादिष्वः एकद्रष्टिपदेभ्यः संभवंतो योगमेवावलंबंत इति नापलपनीयाः पृथ
क् भूतानां चैतन्यप्रतिकादृष्टेः साहत्येपि च साहंत्येपि च यस्या मुख्याः शक्तिरस्ति तस्य समुदाये महच्छक्तिर्दृश्
यते यथा तंतूनां स्वल्पशक्तिमतां समुदाये गजबंधनशक्तिर्दृश्यते न स्वल्पभूतानां पृथक् चैतन्यं दृष्टं येन
साहंत्ये चैतन्योद्भवः स्यात् संहतत्वाविशेषात् मृतदेहस्यापि चैतन्यप्रसंगः तस्मादन्य एव चेतनः उत्क्रम
प्यर्थप्रसंगानुप्रसंगानुप्रसंगेन व्याहृतमिति स्मारितं तेन न पुनरुक्तं साहत्ये वेति वीप्साध्यायसमाप्तौ १। ॥
इति श्रीकपिलसांख्यप्रवचनसूत्रवृत्तौ परपक्षनिर्णयाध्यायः पंचमः ५ सकलशास्त्रार्थे कथिते परपक्षनिर्ज
यानंतरं तमेवार्थं सकलस्यतंत्रन्यायेन वक्तुं षष्ठाध्यायारंभः अस्ति आत्मा नास्तित्वसाधनाभावात् स्पष्टं

सांख्य.

२८

ताप्सस्ययत्रवाद्बुध्यानुग्रहात्तत्रसंबंधार्थाववोधकः कथममूर्त्तायावृत्तेः सर्पणक्रियेत्यत्राह नद्रव्यनियमस्तद्योगात्
अनियतत्वात्पदार्थानांनद्रव्यएवक्रियानियमः किंतुयत्रप्रमाणंदृश्यतेतदनुमन्यामहे वृत्तौचक्रियादृष्टान्यथावृत्त्यु
पलंभाभावात् देशाभेदेभौतिकानींद्रियाणिभविष्यंतीत्यथा वृश्चिकदृष्टस्यदेशाभेदेमरणमित्यत्राह नदेशभेदेप्यन्यो
पादानतास्मदादिवन्नियमः स्वशरीरएवव्याप्तिर्गृहीता अहंकारिकाणींद्रियाणि तद्व्यभिचारे धूमोप्यग्निंव्यभिचरेत्
पांचभौतिकमिति व्यपदेशोहेतुमाह निमित्तव्यपदेशात्तद्व्यपदेशः पंचोपादानता निषिद्धा ननिमित्तता तेनपांचभौतिक
मिति व्यपदेशः कतिशरीरभेदाइत्यत्राह ऊष्मजांडजजरायुजोद्भिज्जसांकल्पिकसांसिद्धिकंचेतिननियमः ऊष्मजोदंद
शूकादिः अंडजाः पक्षिसर्पादयः जरायुजोमनुष्यादिः उद्भिज्जावृक्षादयः संकल्पजोमन्वादिः सांसिद्धिकोमंत्रोषधा
दिसिद्धः चत्वार्येवेतिननियमः देहोत्कंभूतप्रधानमित्यत्राह सर्वेषुपृथिव्युपादानमसाधारण्यात्तद्व्यपदेशः पूर्ववत्
सर्वेष्वितिवाहुल्येन सूर्यादिलोके तैजसंशरीरमितिश्रुतेः तत्रापिबहुतरपार्थिवावयवावष्टंभकत्वं अल्पंवान्यदनु
पभोगात् पूर्ववदितिसर्वमेवोक्तं देहेप्राणदर्शनात्तस्यदेहारंभकत्वशंकामपनयति नदेहारंभकस्यप्राणत्वमिंद्रि
यशक्तितस्तत्सिद्धेः भौतिकवायोर्देहारंभकत्वं नतुप्राणवायोर्भौतिकत्वंप्राणात्सर्वमजायतेतिश्रुतेः यावद्देहभावि
त्वेवारंभकत्वंविभ्रमः सर्वेंद्रियशक्तेः प्राणोधार्यतइति यावदिंद्रियंतावत्तत्सिद्धिः प्राणधारणसिद्धिः देहेनिष्प २८

पर्यनुयोगोस्ति अणुमहद्दीर्घह्रस्वमितिचतुर्विधंपरिमाणंनास्तीत्यत्राह नपरिमाणचातुर्विध्यंद्वाभ्यांतद्योगात् महदणुभ्यांका
र्यवशायोगात्कुब्जवहारसिद्धेरेतस्यभेदाएवान्यपरिणामभेदाइतिप्रकृतिपुरुषव्यतिरिक्तंसामान्यंनित्यमस्तीत्यत्राह अनि
त्यत्वेपिस्थिरतायोगात्प्रत्यभिज्ञानंसामान्यस्य यथासोयंदेवदत्तइतिनसामान्यविषयाप्रत्यभिज्ञातथा अनित्यत्वेपिसामा
न्यस्यबहुकालस्थैर्याद्घटादिषुप्रत्यभिज्ञानमितिसामान्यासत्त्वंनिराकरोति नतदपलापस्तस्मात् नसामान्यापलापः प्र
त्यभिज्ञानात्परोक्तयुक्तेःप्रत्यक्षवाधात् अस्त्येकाकाराबुद्धिः सामान्यनिवृत्तिपराइत्यत्राह नान्यनिवृत्तिरूपत्वंभावप्रती
तेः अभावरूपत्वेप्रतियोगिस्मरणाधीनंज्ञानंलभते नतुविधिमुखतयेति तथाचसिद्धश्चागोरपोहेतगोनिषेधात्मक
ध्वसः तत्रगोरेवव्यक्त्योनन्यायः प्रतिषिध्यते गव्यसिद्धेत्वगौर्नास्ति तदभावेचगौः कुतः सादृश्यनिबंधनाप्रत्यभिज्ञा
भविष्यतीत्यत्राह नतत्त्वांतरंसादृश्यंप्रत्यक्षोपलब्धेः भूयोवयवसामान्ययोगः सादृश्यंतत्त्वांतरंप्रत्यक्षेणेव बहुतरान्या
वयवग्रहणात्तत्सदृशोयमितिज्ञानोत्पादात्तत्त्वांतरमाह निजधर्माभिव्यक्तिर्वा वैशिष्ट्यात्तदुपलब्धेः अस्तिपदार्थानांनिजा
शक्तिः सातुल्यपिंडांतरदर्शनादभिव्यक्ताविशिष्टामतिरीदृशोयमितिसादृश्योपलब्धेः कारणंनतुतत्त्वांतरंसादृश्यंसंज्ञा
संज्ञिसंबंधज्ञानहेतुःसादृश्यमित्यत्राह नसंज्ञासंज्ञिसंबंधोपिनसंबंधज्ञानहेतुःसादृश्यंव्यभिचारादन्यतोप्युपदे
शादेः संज्ञासंज्ञिसंबंधनिश्चयात् करणव्युत्पत्त्याविषयिणाज्ञानस्योपलक्षणंशब्दार्थयोर्नित्यःसंबंधइतिनिरस्य

र्

सांख्य० ति नसंबंधनित्यताउभयानित्यत्वात् शब्दार्थयोरनित्यत्वात्कथंसंबंधोनित्यः स्यात् अजसंबंध अपाकरोति नाजःसंबं
धोधर्मिग्राहकप्रमाणबाधात् संयोगोभवत्कर्मजोभवेत् नचानित्यव्यापकस्यक्रियास्तिमहदादयश्चानित्याः कथंतत्सं
२७ योगोनित्यः आत्मनांचनैर्मकत्वान्नतेः प्रधानेनसंयोगोस्तिनचप्रमाणेनवस्तुगृह्यतेतेनैवसंयोगग्रहणमितिधर्मिग्रा
हकप्रमाणाबाधः समवायंनिरस्यपिनसमवायोस्तिप्रमाणाभावात् समवायःसंबद्धोऽसंबद्धोवा असंबद्धत्वेकथमन्य
संबंधिनंकुर्यात् संबंधित्वेन्यसंबंधस्यासंभवात् समवायोवावक्तव्यः तस्याप्यन्यस्तस्याप्यन इत्यनवस्थानास्ति
समवायः यत्त्वविभागेनप्रतिभासःसमंयोगविशेषचेन्निश्चात् यथातप्तायःपिंडेवन्हिः यदिसमवायोनास्तिकथंघ
कुःपटइतिअस्योगछतिगोरयमितिज्ञानमित्यत्राह उभयत्राप्यन्यथासिद्धेरप्रत्यक्षमनुमानं उभयत्रापितादात्म्ये
नैवोपपत्तेः अन्यथासामानाधिकरण्यंनस्यादिति अनुमेयाक्रियास्यादित्यत्राह नानुमेयत्वमेवक्रियायानेदिश्यस्य
तत्तद्दूतोरेवापरोक्षप्रतीतेः निकटस्थस्यक्रियाक्रियावतोवापरोक्षप्रतीतेः अन्यथासिद्धस्यप्रत्यक्षबाधात् यदि
संयोगविभागाभ्यांकर्मानुमीयतेतयोरुभयवृत्तित्वाद्वृक्षमूलादग्रंगछतिपुरुषेवृक्षेकर्मानुमीयतेननपुरुषकर्म
णासंयोगविभागसिद्धौकिमर्थंवृक्षेकर्मस्वीकर्तव्यंउभयत्रोभयवेदेवं अव्यभिचारात्संयोगविभागाभ्यांवृक्षेपिकर्मा २७
नुमानंननिवर्त्ततेकिंचांधकारेभुजाग्रंमेकपतइत्यादौकंपमात्रज्ञानंनसंयोगवियोगयोरिति सूर्यक्रियानुपलंभ

श्चातिदूरादिदोषात् पंचभूतारब्धंशरीरमित्यत्राह नपंचाभौतिकंशरीरंबहूनामुपादानायोगात् बहूनांभिन्नजातीयाना
मुपष्टंभकत्वेतुचतुर्णांनिमित्तत्वमस्त्येवतेनपांचभौतिकत्वमुच्यतइतिनास्तिसूक्ष्मशरीरंप्रमाणाभावादित्यत्राह नस्थू
लमितिनियमआतिवाहिकस्यापिविद्यमानत्वात् मनसोनिराश्रयस्यगत्यभावान्मरणेदेहप्राप्त्येमनस आश्रयोवक्त
व्यः सएवातिवाहिकंसूक्ष्मशरीरमिति अंगुष्ठमात्रंपुरुषंनिश्चकर्षयमोबलात् पुरिस्थूलशरीरेशेतेइतिपुरुषःसूक्ष्म
देहः अप्राप्तप्रकाशकमिंद्रियंदूरेशब्दोपलंभात् काचस्फटिकांतरितोपलब्धेरित्यत्राह नाप्राप्तप्रकाशकत्वमिंद्रियाणाम्
प्राप्तेःसर्वप्राप्तेर्वा प्राप्तार्थप्रकाशकत्वंश्रोत्रंचवृत्तिद्वारेणशब्देनसहसंबध्यते काचादयस्तुस्वच्छत्वान्नचक्षुःप्रमातार
प्रतिबध्नंतिदूरेचवृत्तिद्वारेणवस्तुग्रहणं यद्यप्राप्तेनगृह्णातिकुड्यव्यवहितवत् दूरस्थेनाप्राप्तेरविशेषादव्यवहितम
पिनगृह्येत अथाप्राप्तिरपिगृह्णाति अविशेषात् जगदुदरवर्त्तिसर्वंगृह्णीयादितियदिप्रसारिचक्षुस्तेजःसंतहीत्यत्राह
नतेजोपसर्पणात्तेजसंचक्षुर्वृत्तितस्तत्सिद्धेः तेजसइवापसर्पणाद्दूरेपिप्रकाशत्वात्तेजसमित्युभिमानः वस्तुतस्तुवृत्ति
द्वारेणसंबंधात्तत्सिद्धेः प्रमेयसिद्धेःवृत्तेरप्रत्यक्षत्वात्कथंवृत्तिसिद्धिरित्यत्राह प्राप्तार्थप्रकाशलिंगाद्वृत्तिसिद्धिः व्यक्तंवृ
त्तिकिंदीपज्वालेवभागरूपागुणांतरं वेत्यत्राह भागगुणाभ्यांतत्त्वांतरंवृत्तिःसंबंधार्थंसर्पतीतिकार्यानुमेयावृत्तिस्त
त्त्वांतरमाहंकारिकं अनियतःपदार्थोयतः असंबद्धस्यसत्तानायोगात् तदर्थंसर्पति तथाचवृत्तयःप्रसरद्रूपाःस्फुलि

सांख्य० र्थावधारणं निर्णयः प्रमाणतर्कसाधनोपालंभः सिद्धांताविरुद्धः पंचावयवोपपन्नः पक्षप्रतिपक्षाभ्यां परिग्रहो वादः
यथोक्तोपपन्नश्छलजातिनिग्रहस्थानसाधनोपालंभो जल्पः सप्रतिपक्षस्थाप
नाहीनो वितंडा सव्यभिचारविरुद्धप्रकरणसमसाध्यसमातीतकाला हेत्वाभासाः वचनविघातोर्थविकल्पोपपत्त्या छलं
३६ तत्त्रिविधं वाक्छलं सामान्यछलं उपचारछलं च धर्म्यवैधर्म्याभ्यां प्रत्यवस्थानं जातिः साधर्म्यवैधर्म्योत्कर्षापकर्षवर्ण्या
वर्ण्यविकल्पसाध्यप्राप्त्यप्राप्तिप्रसंगप्रतिदृष्टांतानुत्पत्तिसंशयप्रकरणहेत्वर्थापत्त्यविशेषोपपत्त्युपलब्ध्यनुपल
ब्धिनित्यानित्यकार्यसमाः विप्रतिपत्तिरप्रतिपत्तिश्च निग्रहस्थानं प्रतिज्ञाहानिः प्रतिज्ञांतरं प्रतिज्ञाविरोधः प्रतिज्ञासंन्या
सो हेत्वंतरमर्थांतरं निरर्थकमविज्ञातार्थकमप्राप्तकालं न्यूनमधिकं पुनरुक्तं अननुभाषणमज्ञानमप्रतिभा विक्षे
पो मतानुज्ञा पर्यनुयोज्योपेक्षणं निरनुयोज्यानुयोज्यानुयोगःऽसिद्धांतो हेत्वाभासाश्च निग्रह इयंत इति न नियमः नवा
तद्बाधान्मुक्तिः आदिशब्दादन्येपि नियतपदार्था निराकार्याः नित्याश्चतुर्विधाः परमाणवः तैरेव महाभूतानां भावात्किं प्र
धानेनेत्यत आह नाणुनित्यता तत्कार्यत्वश्रुतेः प्रधानात्सर्वमजायत प्रकृतिपुरुषादन्यत्सर्वमनित्यमिति श्रुतेः कार्य
त्वात्परमाणूनां नानित्यत्वं कारणत्वं वा एवं च परमाणुत्वमेव न भवतीत्याह नानिर्भागत्वं कार्यत्वात् इहायं पक्षीरत्नाका ३६
शस्य प्रत्यक्षत्वाद्व्यभिचारादुद्भूतरूपनिबंधनात्प्रत्यक्षत्वनियमः अलौकिके च समाधिजन्ये योगिप्रत्यक्षेन

भविष्यतीत्यत आह न निर्भागत्वं तद्योगात् घटवत् किमस्य कारणमहंकारः षट्केन युगपद्योगात्परमाणूनां सभागत्व
सिद्धिः तस्मात् घटादिवदनित्यं मनः नित्यानित्यविभागमाह प्रकृतिपुरुषयोरन्यत्सर्वमनीषं स्पष्टं दिक्कालादीनामनि
त्यत्वात्कथं सर्वमनित्यमित्यत आह न भागलाभो भागिनो निर्भागत्वश्रुते न कारणलाभो भागिनो जगत्कारणस्य प्रधा
नस्य निर्भागत्वश्रुतेः मूलकारणत्वान्नास्य कारणांतरमिति श्रुतेः आनंदाभिव्यक्तिरितित दूषयति नानंदाभिव्यक्तिर्मु
क्तिर्निर्धर्मकत्वात् मुक्तौ धर्मधर्मिभावाभावात् अभिव्यक्तिः किं सर्वदास्ति संसारदशायामपि मुक्तिप्रसंगः अथ मु
क्तौ क्रियते कार्यस्यावश्यं नाशात्पुनरानिर्मोक्ष इति विशेषगुणोच्छित्तिर्मोक्ष इति दूषयति न विशेषगुणोच्छित्तिस्तद्वत् विशे
षनिषेधात्सामान्यगुणस्वीकारः तथा च गुणयोगादनिर्मोक्षः देहपरिमाण आत्मा तस्य देहमात्राकृतिरेव मुक्तिः तं
दूषयति न विशेषगति न विशेषगतिर्निःक्रियस्य न ऊर्ध्वगत्या मुक्तिः निर्गुणनिष्क्रियनिर्धर्मक आत्मेति श्रुतेः कुतो
मुक्तिः हस्तिकृमिदेहपरिणामित्वे न संकोचविकासाभ्यां सावयवत्वेनानित्यश्च स्यात् बौद्धमुक्तिं दूषयति नाकारो
परागोच्छित्तिः क्षणिकत्वादिदोषात् स किमाकारो ज्ञानस्वरूपः तथा च ज्ञानस्याप्युच्छेद इति कस्य मुक्तिः अथ धर्मः ८ स
र्वदा क्षणिकत्वात्तन्नाशे संसारिणामपि मुक्तिः स्यात् अथवा सनातनशास्त्रादान मुच्यते वासनोच्छेदेव मोक्षोस्तु कि त्ति
पकारोपरागोच्छित्त्या आदिशब्दात्स्वच्छसंवित्तिलाभ नाह स्यापि नश्वरत्वात्कस्य मुक्तिरित्यो धाविषयस्य विशेषस्य

सांख्य० मुक्तिंदूषयति नसर्वोच्छित्तिरपुरुषार्थत्वादिदोषात् स्पष्टं शून्यंमुक्तिरितिदूषयति एवंशून्यमपि अपुरुषार्थत्वादेवादिशा
त्वादनुष्ठानाभावः सूचितः यथात्मास्वीक्रियते तदातत्सपरिपंथनिद्वेषः तदनुकूले च स्नेह इति तयोर्बंधहेतुत्वादनिर्मोक्षः स्या
त् मैवं नहि रागद्वेषमात्राधः किंतु तद्विशेषात् यथाबोधपक्ष एव न संवित्संतानमात्राद्बंधः स्वच्छसंवित्संतानस्य मोक्षां
३९ गत्वात् तथा कैवल्यात्मपरिपंथिनिद्वेषान्निरुपहितात्मरक्षितो रागान्नबंधः प्रकृतयोश्च हेतुत्वमेवेति कालदेशकर्मविशे
षान्मुक्तिरितितद्दूषयति संयोगाश्च वियोगांता इति न देशादिलाभोपि देशसंयोगस्य वियोगांतत्वात् पुनः आदिशब्दात्का
लकर्मणोरपि परिग्रहः कालयोगस्याप्येवं कर्मणश्च क्षयित्वात् पुनः संसार इति भागस्य जीवात्मनो भागिनि ब्रह्मणि यो
गो मुक्तिरिति तद्दूषयति न भागियोगो भागस्य न ब्रह्मणो भागो जीवात्मा ब्रह्मणो भागाभावात् योगस्य वियोगांतत्वात्
पुनर्बंधप्रसंगः अथ संसारकारणाभावान्न वियोग इति एवं च स एवास्तु किं भागयोगकल्पनया अणिमादिसिद्धि
रेव मुक्तिरित्यत आह नाणिमादियोगोप्यवश्यंभावित्वात् तदुच्छित्तेरितरवियोगवत् तेषामपि कार्यत्वादनित्यत्वं आदिश
ब्दाल्लघिमाप्राप्तिः प्राकाम्यमीशित्वं वशित्वं यत्रकामावसायित्वमिति परमैश्वर्यपदमाप्तिरेव मुक्तिरित्यत आह नेंद्रापि
तद्वत् अनित्यत्वात् भौतिकानींद्रियाणि तन्निरस्यति न भूतप्रकृतित्वमिंद्रियाणामाहंकारिकत्वश्रुतेः तथा च एत ३५
स्माज्जायते प्राणो मनः सर्वेंद्रियाणि च खं वायुर्ज्योतिरापश्च पृथिवी विश्वस्य धारिणी भूतप्रकृतित्वमिति तु येनेंद्रि

येन यद्भूतकारणं तन्मात्रं गृह्यते तस्य तत्प्रकृतित्वाभिमानाद्व्यपदेशः षट्पदार्थज्ञानान्मुक्तिरित्यत आह न षट्पदार्थनिय
मस्तद्बोधान्मुक्तिः द्रव्यगुणकर्मसामान्यविशेषसमवाया इति पृथिव्यप्तेजोवाय्वाकाशकालदिगात्ममनांसीति द्रव्या
णि रूपरसगंधस्पर्शसंख्यापरिमाणपृथक्त्वसंयोगविभागपरत्वापरत्वे बुद्धयः सुखदुःखे इच्छाद्वेषौ प्रयत्नश्च गु
रुत्वस्नेहद्रवत्वसंस्कारधर्माधर्मशब्दगुणाः उत्क्षेपणविक्षेपणाकुंचनप्रसारणगमनानि कर्माणि परमपरं च सामान्यानि
त्यद्रव्यवृत्तयोंत्या विशेषाः अयुतसिद्धानां यः संबंध इह प्रत्ययहेतुः समवाय इति नास्ति नियमो नियतपदार्थवादित्वा
त्सांख्यानां न च तद्बोधान्मुक्तिः आत्मज्ञानादेव मुक्तेः षोडशपदार्थज्ञानान्मुक्तिरित्यत आह षोडशादिष्वप्येवं प्रमाणप्रमे
यसंशयप्रयोजनदृष्टांतसिद्धांतावयवतर्कनिर्णयवादजल्पवितंडाहेत्वाभासच्छलजातिनिग्रहस्थानानां तत्त्वज्ञानान्निः
श्रेयसाधिगम इति प्रत्यक्षानुमानोपमानशब्दाः प्रमाणानि आत्मशरीरेंद्रियार्थबुद्धिमनःप्रवृत्तिदोषप्रेत्यभावफल
दुःखापवर्गाः प्रमेयं समानानेकधर्मोपपत्तेर्विप्रतिपत्तेरुपलब्ध्यनुपलब्ध्यव्यवस्थातश्च विशेषापेक्षो विमर्शः संशयः
यमधिकृत्य प्रवर्तते तत्प्रयोजनं लौकिकपरीक्षकाणां यस्मिन्नर्थे बुद्धिसाम्यं स दृष्टांतः तत्राधिकरणाभ्युपग
मसंस्थितिः सिद्धांतः स च चतुर्विधः सर्वतंत्रप्रतितंत्राधिकरणाभ्युपगमसंस्थितित्यर्थांतरभावात् प्रतिज्ञाहेतूदाहर
णोपनयनिगमनान्यवयवाः अविज्ञाततत्त्वेर्थे कारणोपपत्तितस्तत्त्वज्ञानार्थमूहस्तर्कः विमृश्य पक्षप्रतिपक्षाभ्यामर्

बंधाभावात् संबंधे वा निःसंगत्वश्रुतिविरोधः आनंदानुभवे च कर्मकर्तृविरोधः किंचानंदात्मत्वे किं प्रमाणं किं प्र
माणानुसरणेन स्वयमेव प्रधानरूपत्वादात्मन इति चेत् न प्रमाणव्यवस्थार्थं प्रमेयस्वीकारात् प्रमेयाभावात् किं प्र
माणेन परिच्छेत्तव्यं प्रमितिरूपप्रधानाभावाच्च प्रमाणत्वमेव नास्ति चिद्रूपत्वं चानानंदरूपत्वं द्वयोर्भेदात् तयोरलौकि
कत्वेनाभेदसिद्धिरित्यपि नालौकिकत्वादेव व्याप्तिग्रहणाभावात् ततो नात्मनो द्विरूपत्वमिति यद्विमुक्त्यानंदो
नानुभूयते किं तेनानुभूयते चेत् अनुभाविनानुभवानुभवतीया वाच्याः यथा च यावद्देहभावित्वेनासंप्रज्ञात्कारादपि
समाधिरित्युच्यते देहपातानंतरमासनः स्थितिरिति कः समाधिः तथा समाधौ सकलदुःखनिवृत्त्या आनंदलाभः इ
त्यभिमन्यते देहाभावात् समाधिनाशे कानंदानुभवः एवं च मुक्तावानंदानुभवो भ्रांत इति अथानंदश्रुतेः का वार्ता
तथा च आनंदं ब्रह्मणो विद्वान् न बिभेति कुतश्चन यतो वाचो निवर्तंते अप्राप्य मनसा सह दुःखनिवृत्तेर्गौणः प्रयुक्तं
प्रकारांतरमाह विमुक्तिप्रशंसा मंदानां तामसानां विमुक्तिप्रशंसा प्रवर्तनार्थं प्रोत्साहनमिति मनो वैभवं
न्निराकरोति न व्यापकत्वं मनसः करणादिंद्रियत्वाद्वास्यादिवच्चक्षुरादिवच्चेति सिमवेदनापाये मिसुखमिति
ज्ञानं मनो विभुत्वं प्रतिपादयति तदाश्रुसंचारित्वात् क्रमाग्रहणनिमित्तं नानेन विभुत्वसिद्धिः दूषणांतरमाह सक्रि ३४
यत्वाद्गतिश्रुतेः सक्रियात्वादित्यनुमानं दर्शितं गतिश्रुतिरिति शब्दो दर्शितः अणुत्वेपि सकारणाभावान्नित्यत्वं

यस्मिन् दृष्टेपि कृतबुद्धिर्जायते तत्पौरुषेयं यथा घटादिकं न तु घटादिषु अदृष्टेपि इति कर्तृदृष्टेति न कार्यमात्रं स
कर्तृकं किंतु कार्यविशेषः परतः प्रामाण्यं दूषयति निजशक्त्यभिव्यक्तेः स्वतः प्रामाण्यं निजशक्तिज्ञानजनकसामग्री
मात्राधीनं प्रमाणानां प्रामाण्यं न त्वधिकं गुणपेक्षते उत्पत्तिपक्षे ज्ञातपक्षेप्यौत्सर्गिकी ज्ञानग्राहकाणां प्रामाण्यबो
ध्यशक्तिस्तदभिव्यक्तेः स्वतः प्रामाण्यसिद्धिरिति प्रवर्तेश्च यत्रापि शंका निवृत्तये प्रामाण्यजिज्ञासार्थं प्रमाणानुस्मर
णं तत्रापि कारणदोषोत्सारणाय न गुणाय अत एवाप्रामाण्यं परतः तत्र दोषस्यापि कारणत्वादिति बौद्धमतं दूषय
ति नासतः ख्यानं नृशृंगवत् इदं रजतमित्यसदेव शुक्तिरजततादात्म्यं प्रतिभाति तत्र असतोऽर्थक्रियाविहात् ज्ञान
जनकत्वानुपपत्तेः यथा मनुष्यशृंगस्य प्राभाकरमतं दूषयति न संतो बाधदर्शनात् इदं रजतमिति इदमिति पुरो
वर्त्तिविषयं रजतमिति स्मरणं द्वे इमे संवित्ती भेदाग्रहात्प्रवृत्तिः अभेदग्रहणास्मृति दर्शनात् नेदं रजतमिति बाधा
च्च न च सम्यग्ज्ञानस्य बाधोस्ति तथा च सत्ययं घट इति ज्ञाने जाते नायं घट इति ज्ञानं स्यात् वेदांतमतं दूषयति
नानिर्वचनीयस्य तदभावात् इदं रजतमिति असत्त्वे अपरोक्षज्ञानाभावात् सत्यत्वे बाधाभावात् अतः सदसद्विल
क्षणनिर्वचनीयत्वं तथा च न सत्त्वे बाधसंवित्तिर्न भानमसतोपि च न द्वयात्मविरुद्धत्वादतस्तत्त्वाभरं कुतः मायाम
यत्वसिद्धौ च प्रपंचस्य प्रमाणतः प्रत्यक्षादिप्रमाण्यानां प्रामाण्यं व्यावहारिकं अद्वैतागमवाक्यं तु तत्त्वावेदलक्षणं
प्रमाणभावं भजते भावबेधुर्यहेतुतः तस्मान्मायामयत्वेपि युक्ता ब्रह्मणि मानता अद्वैतागमवाक्यानामिति तावत्

सांख्य० ख्यवस्थितं तत्र इदं रजतमित्यनेनैव अनिर्वचनीयत्वात् न सन्नासन्निति अनिर्वचनीयत्वेनानिर्वचनीयत्वाच्च न्याय
मतं दूषयति नान्यथाख्यातिः स्ववचोबाधात् इदं रजतमिति शुक्तिरेव रजतात्मनावभासत इति न अन्यदन्यात्म
३२ नावभासत इति संविद्विरुद्धं आरोपितरजतमेव तत्रावभासत इति स्वमतमाह सदसत्ख्यातिर्बाधाभावात् इदं रज
तमिति पुरोवर्तिविषयतया सदयाधनात् रजतविषयतयात्व सद्बाधात् तस्मात्सनीतसंस्फोटं निराकरोति प्रती।
त्यप्रीतितीन्यां स्फोटात्मकः शब्दः प्रतीति वर्ण अप्रतीतिः स्फोटे इति तस्मान्न स्फोटात्मकः शब्दः यदि वर्णाः किंचिदपि
न प्रतिपादयंति स्फोटप्रतिपादनं अथ प्रतिपादयंति किमंतर्गडुना स्फोटेन वर्णा एव प्रतिपादकाः संतु नानात्वादपि
न स्फोटसिद्धिः प्रत्यक्षबाधात् वेदस्यानित्यत्वमुक्तं वर्णानामतिसत्वं कार्यताप्रतीतिः प्रत्यक्षादेः श्रवणानंतरं नास्ती
ति प्रतीतेः अन्यथा घटस्यापि नित्यत्वं प्रकृतिपुरुषादन्यत्सर्वं कार्यमिति प्रतिपादनार्थं शक्तेः पूर्वं सिद्धसत्वस्या
भिव्यक्तिर्दीपेनेव घटस्य यथांधकारस्थो घटो दीपेनाभिव्यज्यते तथा वर्णाः ध्वनिभिर्व्यज्यंते तदभावान्न सं
तीतिप्रतिभानं न तत्सहात् समाधानमाह सत्कार्यसिद्धांतश्चेत् सिद्धसाधनं अभिव्यक्तिमाश्रित्य नित्यत्वमुच्य ३२
ते ततः सत्कार्यसिद्धांतश्चेत् सिद्धसाधनं एक एवात्मा तथैकः सन् पृथक् पृथक् तन्निराकरोति नाद्वैतमात्म
नो लिंगात् द्वंद्वप्रतीतेः जरामरणादिलिंगनियमात् पूर्वं नित्यसिद्धवदुक्तं इदानीं चाध्यते इत्यपौनरुक्त्यं माभूत्सजाती

याद्वैतं अनात्मानो भविष्यंति घटादयश्चात्मरूपा इति विष्यतीत्यत्राह नानात्मनापि प्रत्यक्षबाधात् न अनात्मना घटा
दिना आत्मन एकत्वं घटादीनां चात्मत्वेन भेददर्शनात् एकस्यैव घटादीनामात्मत्वमात्मनः स्वपरिणामित्वमिति सजा
तीयविजातीयाद्वैतं भविष्यति तत्राह नोभाभ्यां तेनैव अबाधितप्रत्ययेनैव भेददर्शनात् एवमद्वैतश्रुतिविरोधः इत्य
त्राह अन्यपरत्वमविवेकानां तत्र अंधानां तत् श्रुतेरन्यपरत्वं सामान्यपरत्वं एकात्मवादिनां जगदुपादानकारण
मपि नास्तीत्याह नात्माविद्यानोभयं जगदुपादानकारणं निःसंगत्वात् कूटस्थत्वान्नात्मा कारणं अविद्याया असत्
त्वान्न कारणत्वं सत्त्वे अद्वैतहानिः संबंधाभावान्नोभयं कारणं चिदानंदस्वरूप आत्मेत्यत्रानेकस्यानंदचिद्रूपत्वे
द्वयोर्भेदात् आनंदः सुखं चित् ज्ञानं आनंदचिद्रूपत्वे द्वैतापत्तिः न चानंदो विषयजं सुखं चितिर्वा वृत्तिज्ञानं किं त्वन्य
देवालौकिकमिति वाच्यं अलौकिकत्वेन प्रमाणित्वात् प्रमाणिके प्रमाणत्वेनैव द्वैततं किं चात्मन आनंदरूपत्वं आ
नंदधर्मत्वं आनंदधर्मत्वे द्वैतत्वापत्तिः निर्गुणत्वादिति श्रुतिविरोधश्च आनंदरूपत्वे संसारावस्थायां कथमानंदो
नानुभूयते अविद्यातिरोधानादिति चेत् अमूर्तत्वात् पिधायाकुञ्चनत्तिरोधानासंभवः अथाभिभवस्तिरोधानं
शब्दार्थः नित्यस्य चित्तनो नाभिभवः अविद्याया मिथ्यात्वादात्मनः सत्यत्वान्न तयोः संबंधः वस्तुवस्तुनोः सं

यागादावनाश्वास इति वेदप्रामाण्यप्रतिपादनार्थमाह नयज्ञादेः स्वरूपतो धर्मत्वं बोद्धव्यमात वैविध्यं कालदेशपात्रापेक्ष
सांख्य० या तन्निरपेक्षत्वेन न स्वरूपतो धर्मत्वं अन्यथाःमुष्यकाले म्लेच्छदेशे महापातकिभिश्च कृतायत्तादेर्या धर्महेतवः स्युः
नन्वेवं अर्तस्य फलदर्शनाद्वेदस्य प्रामाण्यमितमुष्यस्याकिं क्रियत इत्यत्राह निजशक्तिव्युत्पत्त्यावच्छिद्यते अयं वाच्यो
त्रवाचकत्वेन मुख्योऽत्र गौण इति व्यवच्छिद्यते व्युत्पत्तिसिद्धिः कथं ज्ञायत इत्यत्राह योग्यायोग्येषु प्रतीतिजनकत्वा
३२ तत्सिद्धिः प्रसिद्धाप्रसिद्धेषु लौकिकवैदिकपदार्थेषु ज्ञानजनकत्वात् व्युत्पत्तिसिद्धिः वेदनित्यत्वं निराकरोति नानि
त्यत्वं वेदानां कार्यश्रुतेः श्रुतिस्तावन्नाह रासीन्नरात्रीरासत्तस्तयोः तप्यततस्मात्तपस्तेपानात्त्रयो वेदा अजायंत
अनुमानं च कृतकत्वादित्यादि प्रत्यक्षेणाप्युच्चरितप्रध्वंसितो वर्णो इति गृह्यंते यस्तु स एवायं ककार इति प्रत्यय
ससामान्यविषयः अनित्यत्वात्पौरुषेया वेदा इत्यत्राह नपौरुषेयत्वं तत्कर्तुः पुरुषस्याभावात् निराकृतईश्वर
इत्यभिसंधिः अन्य एव कर्ता भविष्यतीत्यत्राह नमुक्तामुक्तयोरयोग्यतात् मुक्तस्य निःसंगत्वात्कर्तृत्वायोगात्
अमुक्तस्य युगपदुपादानानभिज्ञत्वादिति अपौरुषेयत्वात्तर्हि नित्यत्वमत आह नापौरुषेयत्वान्नित्यत्वमंकुरादि
वत् स्पष्टं अंकुरादीनां कर्तुरदृश्यत्वात्सत्यस्य बाधः अयोग्यश्च कर्ता नास्तीत्युक्ते आदिशब्दाद्व्याप्यत्वासिद्धेर्दे
र्शिता अनित्यत्वपौरुषेयत्वयो व्याप्तिर्नास्तीत्याह तेषामपि तद्योगे दृष्टबाधादिप्रसक्तिः यत्पौरुषेयं तच्छरीरजन्यमि ३२
ति व्याप्तिर्लौकिके दृष्टांतस्याबाधादेरेवं सति स्यादित्यर्थः नन्वादिपुरुषोच्चरितत्वाद्वेदा अपि पौरुषेया एवेत्यत्राह

वेत्यत्राह विद्यावाध्यते जगतोप्येवं जगतोप्यविद्यात्वं अस्तु जगतोप्यविद्यात्वमित्यत्राह तद्रूपत्वे सादित्वं आनादिरियमविद्या
जगतस्तद्रूपत्वेऽविद्यायाः सादित्वं न कर्मणो जगत्कारणत्वं स्वभावादेव जगदुत्पद्यत इत्यत्राह नधर्मापलापः प्रकृतिकार्यवैचि
त्र्यात् प्रकृतेर्नित्यस्यात्मभावस्यैकत्वाद्धर्माभावाद्वैचित्र्यकार्यानुत्पत्तेः तस्माद्धर्मभेदेन कार्यवैचित्र्यं न धर्मापलापः ध
र्मसिद्धौ प्रमाणमाह श्रुतिलिंगादिभिस्तत्सिद्धिः श्रुतीतिशब्दं प्रमाणं दर्शितं लिंगेत्यनुमानं आदिशब्दाद्योगिप्रत्यक्षं एभि
र्धर्मसिद्धिः यद्दिदेशकालयोर्न कारणत्वं कथं कश्मीरं कुंकुमं वसंते चूतमुकुलोत्पत्तिरित्याह न नियमः प्रमाणांतरावका
शात् नादृष्टमेव कारणमिति नियमः किंतु अदृष्टं सहकारिकारणमन्येषामपि कारणत्वं प्रमाणसद्भावात् दुःखमयं संसार
दर्शनादुरितादृष्टमेवास्त्वित्यत्राह उभयत्राप्येवं सुखस्यापि दर्शनाच्छुभादृष्टमेवास्तु दुःखाभावे सुखाभिमानान्ना
त्र दृष्टशब्दो मुख्यः सुखकारणे गौण इत्यत्राह अर्थात्सिद्धिश्च समानमुभयोः एतद्विपरीतसंभवादुभयोस्तुल्यत्वमित्यभि
ति धर्मादीनामात्मधर्मत्वं निषेधति अंतःकरणधर्मत्वं धर्मादीनां बुद्धिधर्मत्वमात्मत्वमात्मधर्मत्वं निःसंगत्वश्रुतिविरोधः
अन्यधर्मस्यान्यत्र कार्यदर्शनादूरमसत्त्वमेव धर्मादीनामित्यत्राह गुणादीनां च नात्यंतबाधः यथा पृथिव्यादीनां दृष्टत्वान्
त्यंतबाधः तथा गुणादीनां धर्मादीनामपि अन्यधर्मस्याप्यन्यत्र कार्यकारणचितिच्छायापत्तेस्यकं दुःखाभावः सुखमिति
तत्प्रतिषेधार्थमाह पंचावयवसंयोगात्सुखसंवित्तिः यद्यप्यमानस्य प्रत्यक्षेणाभावरूपं सुखमवसीयते तथापि परबो
धाय प्रमाणमप्युक्तं पंचावयवयोगादिति पंचावयवमनुमानमिति निरस्तं प्रतिज्ञाहेतुदृष्टांतोपनयनिगममिति अनेन

पक्षधर्मत्वं सपक्षेसत्त्वं विपक्षाद्व्यावृत्तिरसत्प्रतिपक्षत्वमबाधितविषयत्वं सिध्यंसकृद्दर्शनाद्व्याप्तिरित्याह नसकृद्ग्रह
णात्संबंधसिद्धिः स्वप्रतीतिविरोधात् तथाच वन्हिरासभयोः सकृद्दर्शनादनुमानं स्यात् नैवं प्रतीयत इति किंव्याप्तिरि
त्यत्राह नियतधर्मसाहित्यमुभयोरेकतरस्य वा व्याप्तिः उभयोरिति समव्याप्तिकयोः कृतकत्वानित्ययोः एकतरस्य विप
मव्याप्तिकस्य धूमस्य तथा च यावच्छाव्यतिरेकत्वं शतांशेनापि शंकते विपक्षस्य कुतस्त्वा वह्नेर्तोर्गमनिकावलं तत्वांतरं व्या
प्तिरिति तन्निराकरोति न तत्वांतरं वस्तुकल्पनाप्रसक्तेः तत्वांतरस्वीकारेपि अव्यभिचारो वक्तव्यः स एवास्तु किं वस्तुक
ल्पनयेति स्वमतमाह निजशक्त्युद्भवमित्याचार्याः अस्ति वन्हिधूमयोर्निजाशक्तिः साहाय्येदर्शनेन गृह्यते सैव व्याप्तिरि
ति एकदेशिमतमाह आधेयशक्तियोग इति पंचशिखः यदि निजाशक्तिरव्युत्पन्नस्यापि वस्तुनो दर्शनादत्रायं शक्त इ
तिज्ञानं स्यात् न चैवं तस्मादाधेयशक्तिर्वाच्येति युक्तमाह न स्वरूपशक्तिनियमः पुनर्वादप्रसक्तेः यदि स्वरूपं शक्तिः
शक्तो मल्ल इति पुनरुक्तं स्यात् युक्त्यंतरमाह विशेषणानर्थक्यप्रसक्तेः शक्तो देवदत्त इति प्रत्ययो न स्यात् किंतु देवद
त्तो देवदत्त इति अपरां युक्तिमाह पल्लवादिष्वनुपपत्तेः पल्लवादिषु स्वरूपस्य तादवस्थ्यादप्रयुक्तेरपि मंत्रविदूषाप
नोदनं स्यात् समाधानमाह आधेयशक्तिसिद्धौ निजशक्तियोगः समानन्यायात् निजा चाधेयशक्तिश्चेति निजशक्तिः ३९
न तु स्वरूपमेव शक्तिः तथा चाधेयशक्तिसिद्धौ निजशक्तियोगः समानन्यायत्वात् तथा च शक्तेरविशेषादाधेयशक्ति
योगो वा निजशक्तियोगो वेति समानन्यायः यत्तु वस्तुग्रहणे प्रथमं न गृह्यते च्चिन्नशक्ति त्वात्सादाद्यो नान्यथास्थितोपि

पितापुत्रसंबंधो विनोपदेशान्न गृह्यते अत एवोक्तं निजशक्त्युद्भवमिति पदार्थमीमांसा तादात्म्यं निषेधति वाच्यवाचकसंबं
धः शब्दार्थयोः तादात्म्यपक्षे घटोपि श्रोत्रग्राह्यः स्यात् शब्दोपि चाक्षुषः स्यात् अस्मात्क्षुरणे सुखदाहादिप्रसंग इति
अत्र हेतुमाह त्रिभिः संबंधसिद्धेः त्रिभिः प्रकारैः व्युत्पत्तिग्रहणात् आप्तोपदेशात् यथायं घट इति च वृद्धव्यवहारात्
यथा गामानय शुक्लां दंडेनेति अत्र प्रयोजकवृद्धवाक्यात्प्रयोज्यवृद्धप्रवृत्तिं दृष्ट्वा बालस्य प्रसिद्धपदसामानाधिक
रण्यात् यथा पक्षी आम्रं भक्षयतीति श्रुत्वा आम्रभक्षणार्थं जानाति पक्षीति तदानीं प्रतिपद्यते कार्यव्युत्पत्तिरिति
नियमं व्युदस्यति न कार्ये नियम उभयथादर्शनात् कार्ये व्युत्पत्तिर्दृष्टा यथाऽहरहः संध्यामुपासीत इति सिद्धार्थे दृष्टा
च यथा हरिर्देवाधिदेवः तथाहि विध्यर्थवादमंत्रात्मका वेदा विधौ कार्यत्वे कार्यसमवेतायामिष्टसाधनतायां प्रामा
ण्यं विधिशक्तेरुत्तंभकत्वेनार्थवादस्यापि पारंपर्येण प्रवर्तकत्वात्प्रामाण्यं विहितस्मारकत्वेन मंत्रस्यापि प्रामाण्यं
अथ प्रवृत्तिनिमित्तत्वान्मंत्रार्थवादयोः प्रामाण्यं न तु प्रतिपादकत्वं तन्न उत्सत्तावस्ति प्रवत्सर्थत्वं तत्तो तु सिद्धार्थप
रत्वमेव तस्मात्सिद्धार्थप्रतिपादकयोरर्थवादमंत्रयोः प्रामाण्यमिति अतींद्रियत्वाद्वेदार्थस्य कथमुभयथा व्युत्प
त्तिरित्यत आह लोकव्युत्पन्नस्य वेदार्थप्रतीतेः य एव लौकिकास्त एव वैदिका इति सामान्यादिहापि व्युत्पत्तिरिति भवे
देवं यदि वेदस्य पौरुषेयत्वं स्यात् न चैवमित्याह निर्विधिरपौरुषेयत्वबुद्धिदस्य तदर्थस्याप्यतींद्रियत्वात् ईश्वरस्य
निराकृतत्वादन्यस्यासंभावात् भ्रांतेः पुरुषधर्मत्वेनाप्तत्वानिश्चयाद्वेदस्याप्रामाण्यापत्तेरिति वेदाप्रामाण्ये

यत कारणत्वात् अविनाभावस्य करणत्वव्यभिचारे सर्वनाश्वासः रागश्च प्रवृत्तिनिमित्तमिति तं विना कथं जगन्निर्मातृ
सांख्य० त्वं न च मुक्तस्य रागोस्ति राग एव भविष्यतीत्यत्राह तद्योगेपि न नित्यमुक्तः रागयोगेपि प्रधानशक्तियोगात्कर्तृत्वं भविष्यती
त्यत्राह प्रधानशक्तियोगाच्चेत्संगापत्तेः असंगो ह्ययं पुरुष इति तद्विरोधापत्तिः न प्रधानसंगः किंतु प्रधानसत्तामात्रेण कर्तृ
त्वं भविष्यतीत्यत्राह सत्तामात्राच्चेत्सर्वैश्वर्यं सर्वात्मनः प्रति प्रधानसत्ताया अविशेषात्सर्वात्मनामीश्वरत्वं ईश्वरसाधनानि
३० प्रमाणानि संतीति तत्कथमित्यत्राह प्रमाणाभावान्न तत्सिद्धिः प्रत्यक्षप्रमाणाभावात् अनुमानं भविष्यतीत्याह संबंधाभा
वान्नानुमानं प्रत्यक्षपूर्वकत्वाद्व्याप्तेस्तदभावात् कुतः संग्रहः न चासाधारणस्य संबंधग्रहः शाब्दं प्रमाणं भविष्यतीत्य
त्राह श्रुतिरपि प्रधानकार्यस्य प्रधानाज्जगदुत्पद्यते इति श्रुतिरस्ति तस्मादीश्वरसाधकप्रमाणाभावान्न अविद्यायोगादा
त्मनः कर्तृत्वमिति केचित्तत्राह नविद्याशक्तियोगो निःसंगस्य उक्तं दूषणांतरमाह तद्योगे तत्सिद्धौ अन्योन्याश्रयत्वं अ
विद्यया विना न सृष्टिः सृष्ट्या विना नाविद्येति अन्योन्याश्रयत्वं अनादित्वाद्बीजांकुरवन्नान्योन्याश्रयत्वमित्यत्राह न
बीजांकुरवत्सादिसंसारश्रुतेः भवेदेवं यद्यनादिः संसारः किंतु सादिः संसारश्रुतिश्च विश्वतश्चक्षुरुत विश्वतोमुखो
विश्वतो बाहुरुत विश्वतस्पात् सं बाहुभ्यां धमति सं पतत्रैर्द्यावाभूमी जनयन्देव एकः तस्मात्प्रलये प्रवाहविच्छेद इति ३०
अविद्यास्वरूपमाह विद्यातोन्यत्वे ब्रह्म बाधप्रसक्तेः विद्यातोन्यत्वे ब्रह्मणोपि विद्यातोन्यत्वे विद्यात्वं स्यात् ततश्च अबाधे नैष्फल्यं यदि विद्यया विद्या न बाध्यते विद्यैव न भविष्यतीति बाध्यते
ब्रह्मत्व बाध इति युक्तं तदनंतरमाह

स्य किंतु मननादेर्यथा इंद्रविरोचनौ तत्त्वज्ञानाय ब्रह्मलोकं गतौ ब्रह्मणा चोपदिष्टौ विरोचनस्तु तत्त्वज्ञानश्रवणात्स्वगृहमाग
तो न मननादिकृतवान् अतो नामुच्यत इंद्रस्तु ब्रह्माणमाराधयन्बहुकालं मननमकरोत् इंद्रस्य किं वृत्तमित्यत्राह दृष्ट
स्तयोरिंद्रस्य तयोर्मध्ये इंद्रस्य चाधीदृष्टः बहुकालाराधनेन ब्रह्मप्रसादनान्मनननिदिध्यासनसाक्षात्कारासिद्धि
रिति ज्ञानप्राप्तिः कथमित्यत्राह प्रणतिब्रह्मचर्योपसर्पणात्कृतायां सिद्धिर्बहुकालात्तद्वत् अप्रणतस्याब्रह्मचारिणो
नधिकारस्तद्वत् इंद्रवत् यथा ब्रह्माराधनेनेंद्रेण ज्ञानं प्राप्तं तथा गुर्वाराधनेनान्येनापि किं कालदेशनियमान्मुक्तिः
तथा च चिरक्षिप्रभावो न स्यादित्यत्राह न कालनियमो वामदेववत् आराधनार्थे कालनियमेन मोक्षार्थे वाम
देवस्य तत्त्वज्ञानात्क्षिप्रं मुक्तिदर्शनात् ज्ञातेहि ध्याये न चासौ केनापि दृष्टः दृष्टः श्रेयः किं ध्यानेनेत्यत्राह अध्यस्तरू
पोपासनात्पारंपर्येण यज्ञोपासकानामिव धर्मः केन दृष्टः तथापि धर्मत्वाभावाद्धि यज्ञोपासनं पारंपर्येण देवतोद्दे
शेन हविस्त्यागात् अत्रापि गुरूणा यदध्यस्तं रूपं तत्स्वरूपोपासनात्पारंपर्येण तद्रूपं प्रकाशते दृष्टं च समानव
स्तुचिंतायां समानानुस्मरणं तथा सदृशादृष्टचिंतायाः स्मृतिबीजस्य बोधकाः अतो नातिप्रसंगोस्ति स्वप्नादौ
भावनाबलात् ब्रह्मादिलोकभावात्कस्यस्य किमात्मज्ञानेनेत्यत्राह इतरलाभेप्यावृत्तिः पंचाग्निगतो जन्मश्रु
तेः अग्निहोत्रादिनां ब्रह्मलोकप्राप्तिः कर्मजश्च क्षीयत इति पुनरावृत्तो जन्मश्रुतिः यथेह कर्मजितो लोकः

सांख्य०

२९

क्षीयतएवमेवामुत्रपुण्यकृतोलोकः क्षीयतेइतिनकर्मणानप्रजयाधनेनत्यागेनैके अमृतत्वमानशुरितिविरक्तस्यकिं
स्वरूपमित्यत्राह विरक्तस्यहेयहानमुपादेयोपादानंहंसक्षीरवत् यथातिसर्वेषांहेयहानमुपादेयोपादानंतथापि
प्रकरणाद्विशेषाद्धेयः संसारः उपादेयोमोक्षइतिद्रष्टव्यं अत्रयुक्तिमाह लब्धातिशययोगाद्वातद्वत् हंसवत् हंसस्यवा
तिशयशक्तिर्येनमिश्रितमपिक्षीरंपिबतिजलंत्यजतितथालब्धातिशयस्यपुंसः संसारोहेयउपादेयोमोक्षइतिसराग
स्यापिमुक्तिर्भविष्यतीत्याह नश्चुकवत्कामचारित्वंरागोपहतेरागोपहतस्यकामचारित्वमेवनास्तिकिंपुनर्मुक्तिरि
तियथाव्यासस्यसरागस्यनमुक्तिरितितत्सुतस्यशुकस्यवीतरागत्वान्मुक्तिर्भूतैवबंधःकथमित्यत्राह गुणयोगा
द्बधःशुकवत् यथाशुकः पक्षीगुणयोगाद्बंधमाप्नोतितथागुणयोगात्पुमानपिबंधमाप्नोतिभोगादेववैराग्यंका
लवशाद्भविष्यतीतिकिंज्ञानेनेत्यत्राह नभोगाद्रागशांतिर्मुनिवत् नमुनेरपिभोगाद्रागशांतिः किंपुनरन्यस्ययथा
कश्यपसौभरिप्रभृतयोविषयिणाकथंवैराग्यंभविष्यतीत्यत्राह दोषदर्शनादुभयोः उभयोरात्मनोविषयस्यआ
त्मनोदोषः संगान्नरकपातोगर्भवासादयश्चविषयदोषःपरिणतिविरसत्वादिः उपदेशानधिकारिणंपुरुषमा २९
ह नमलिनचेतस्युपदेशबीजप्ररोहोऽजवत् यथाऽसंस्कृतक्षेत्रेनबीजप्ररोहः तथारागादिमलिनेचेतसिनोप
देशबीजप्ररोहः अजवदिति अजनाम्निनृपेभार्याशोकार्त्तेयथावसिष्ठेनोपदेशोदत्तोनस्थिरीबभूवरागादिम

लिनेचेतसिनाभासज्ञानमपीत्याह नाभासमात्रमपिमलिनदर्पणवत् यथामलिनेदर्पणेमुखाभासमपिनप्रति
भाती तथाप्रधानप्रतिबिंबितत्वादात्मनः प्रधानकार्यमात्मज्ञानमिव ननुमहानेवकारणरूपत्वादात्मसाक्षित्वस्यत्राह
नतज्जस्यापितद्रूपतापंकजादिवत् नकार्यमेवकारणंभेदान्नहिपंकजएवपंकः अणिमादिविभूतिसिद्धस्यापिनकृ
त्यतामाह नभूतियोगेकृतकृत्यताउपास्यसिद्धिवत् यथागुरूपासनमात्रसज्ञानेनसिद्धस्यानाकृतेःकृतकृत्यतात
तानभूतियोगेनपुनरावृत्तेः उपास्यसिद्धिवदितिवीप्साध्यायपरिसमाप्तौ इतिश्रीकपिलसांख्यप्रवचनसूत्रवृत्तौ
आख्यायिकाध्यायश्चतुर्थः आख्यायिकानंतरंपरपक्षनिर्जयार्थंपंचमाध्यायारंभः मंगलाचरणंशिष्टाचारात्फलद
र्शनाच्छ्रुतितश्चेति कृतेपिमंगलेग्रंथापरिसमाप्तेरकृतेपिसमाप्तेःकिंमंगलेनेतियेरुक्तंतदनेननिरस्तंपूर्वसिद्धमीश्वरासत्त्व
मिदानींन्यायमाह नेश्वराधिष्ठितेफलसंपत्तिःकर्मणातत्सिद्धेः यदीश्वरःस्वतंत्रः कर्ताकर्मणाविनापिकुर्यात् अथक
र्मसहकारीकुरुतेकर्मैवास्तुकिमीश्वरेणनचसहकारिप्रधानेशक्तिंबाधतेस्वातंत्र्यविधानात् किंचस्वार्थपरार्थाभ्यां
प्रवृत्तिर्दृष्टानचेश्वरस्यस्वार्थमस्तिपरार्थंकारुणिकस्यदुःखमयसृष्ट्यानुपपत्तिःनचपरार्थप्रवृत्तिःपरोपकाराद्धिनापि
स्वार्थलाभात्प्रवृत्तेः तस्मात्कर्मैवजगत्कारणमस्तुएतद्दर्शयति स्वोपकारादधिष्ठानंलोकवत् नचानित्यस्यस्वोप
कारःसमस्तिस्वोपकारणंभविष्यतीत्याह लौकिकेश्वरवदितरथा असर्वज्ञइत्यर्थः दूषणांतरमाह पारिभाषिको
वाप्रकृतिच्छायापन्नत्वात्कर्तृत्वादात्मैवकर्तेतितस्येश्वरसंज्ञेतिपारिभाषिकेतिहेत्वंतरमाह नरागादृतेतत्सिद्धिःप्रतिनि

सां॰स॰ प्रतीक्षमाणा उन्निद्रा दुःखमनुभूतवती एकदा तु संतप्ता दुःखान्नैराश्यात् पुनः नैव करिष्यामीति निर्विण्णा बभूव निराशासु
खं स्वपिति गृहारंभो दुःखायेत्याह अनारंभे यगृहे सुखी सर्पवत् व्यक्तं शास्त्रव्याख्यातं परोपालंभादि कमसा
२८ रमस्ति तत्परित्यजनीयमित्याह बहुशास्त्रगुरूपासनेपि सारादानं षट्पदवत् यथा भ्रमरः पुष्पं विहाय मधु समा
दत्ते तद्वन्मोक्षार्थिना उपविद्या त्याज्येति कस्य समाधिर्भवतीत्याह इषुकारवन्नैकचित्तस्य समाधिहानिः यथे
षुकारः इषोगतमनाः समीपे गच्छंतं राजानं न बुद्धवान् तथैवैकाग्रमनसो न समाधिहानिरिति सत्वमुद्ध्यर्थेन
व्रतादिभंगः कर्तव्य इत्याह व्रतनियमलंघनादानर्थक्यं लोकवत् यथा लोके बहुभिः कृतसमयलंघनं सर्वेप
रित्यजंति तथा व्रतादिलंघनादृष्टार्थनाशो भवतीति तत्त्वज्ञानविस्मरणेन दुःखमवश्यं भवतीत्याह तद्वि
स्मरणे भेकीवत् कश्चिन्नृपो मृगयां गतो वने सुंदरीं कन्यामपश्यत् तामपृच्छत् का त्वमिति साप्राह राजदुहि
ताहं राजाप्राह मां भजस्वेति साप्राह बाढं किंतु समयं कुरु त्वया जलं मम न दर्शयितव्यमिति एवमस्त्विति कृत्वा
तस्याः पाणिं जग्राह एवं गते काले क्रीडया आयासिता कुत्र जलमिति राजानं पप्रच्छ राजापि संभ्रमात्समयं
विस्मृत्य जलमदर्शयत् सा च भेकराजदुहिता जलस्पर्शाद्भेकी बभूव राजापि जलादिना तामन्विष्याप्राप्य च २८
दुःखमनुबभूव तस्मात्तत्त्वाभ्यासाविच्छेदो न कार्य इति आख्यायिका ततमाह नोपदेशश्रवणेपि कृतकृ

त्यताभ्यासादृतेतितिसागाद्विवेकसिद्धिः स्पष्टं श्रुतिश्च स एष नेति नेत्यात्मा अगृह्यो न हि गृह्यते अशीर्यो न हि शीर्यते यदि तत्त्वा
भ्यासादिना मोक्षः उपदेशानंतरं सर्वशिष्याणां मुक्तिः स्यात् अभ्यासस्य तुल्यत्वादित्यत्राह अधिकारिप्रभेदान्न नि
यमः उत्तममध्यमाधमशक्तिभेदादेकदेति न नियमः यदि विवेकान्मुक्तिः कथं विवेकिनो भोगदर्शनमित्यत्राह बाधितानु
वृत्त्या मध्यविवेकतोप्युपभोगः तीव्रविवेकस्योपभोगो नास्ति मध्यविवेकस्याप्युपभोगवाग्भावाद्चलविज्ञानेन
बाधितत्वाद्वासनानुवृत्तिमात्रं उपारूढफलं कर्मापि प्रयोगात् क्षिणोमी कृपभुंक्ते इति मध्यविवेकिनः स्वरूपमाह
जीवन्मुक्तश्च मुक्त इव मुक्तो रागाभावात् धर्मानुपपत्तेः आसनं चेद्द्विजातियादृश्यमस्तीति पुरुषः किमिच्छन्कस्य कामाय
शरीरमनुसंज्वरेत्। जीवतो मुक्तिरित्यनुपपत्तेरिदमाह उपदेश्योपदेष्टृत्वात्तत्सिद्धिः तीव्रविपाकिनो वाक्यसंवेदिनो
पदेष्टात्वमेव नास्ति मंदविवेकिनोप्यज्ञानान्नोपदेष्टृत्वं किंतु स उपदेश्यः उपदेष्टा मध्यविवेकी अतस्तत्सिद्धिः जी
वन्मुक्तिसिद्धिः अत्र प्रमाणं दर्शयति श्रुतिश्च उवाच जीवन्नेव हि विद्वान्हर्षामर्षाभ्यां विमुच्यते इति मंदविवेकोप्युपदे
ष्टा भविष्यतीत्यत्राह इतरथान्धपरंपरा अज्ञानी गुरुः किं च शिष्योऽकृतार्थ इति उपदेशो हि ज्ञानान्मोक्षः उपदेशानंतरं मु
च्येत किं विलंबेनेत्यत्राह चक्रभ्रमणवद्धृतशरीरः यथा दंडापगमे संस्कारवशाच्चक्रं भ्रमति तथा विवेकिनामपि
देहधारणं कर्मणोऽक्षीणत्वान्न तत्क्षणान्मुक्तिः किंतूपभोगादिना कर्मक्षयादिति तथा च श्रुतिः दीर्घीयिवनगोमु

ति
व्योऽपि न मुक्त इत्याह संस्कारलेशतस्तत्सिद्धिः जीवन्मुक्तिसिद्धिः कदा परममुक्तिरित्यत्राह विवेकान्निःशेषदुःखनि
सांख्य० वृत्तौ कृतकृत्यो नेतरान्नेतरात्॥ निःशेषस्य त्रिविधदुःखस्यात्यंतनिवृत्तौ कृतकृत्यः परममुक्तिप्राप्तः नेतरादिति वीप्सा
ध्यायपरिसमाप्तौ इति कापिलसांख्यप्रवचनसूत्रवृत्तौ वैराग्याध्यायस्तृतीयः वैरानंतरं शिष्यप्रबोधाख्यायि
२७ कार्थं चतुर्थाध्यायारंभः राजपुत्रवत्तत्त्वोपदेशात्॥ कश्चिद्राजपुत्रो गंडक्षणजन्मा निस्सारितः शबराधिपेन गृहीतः
पुत्रत्वेन तदाचारमार्गं जानाति अथापुत्रस्य राज्ञो मरणे मासेशानीयप्रबोधितो न त्वं शबरः राजपुत्रोऽसीत्युक्ते झटिति
वपूर्वसंस्कारवशाद्राजपुत्राचारं गृहीतवान् एवं मंदानामपि प्रबोधायोपदेशो देय इति आख्यायिकांतरमाह
पिशाचवदन्यार्थोपदेशेऽपि कश्चिदाचार्यो विजने उपदेशं गृह्णाति शिष्यमादायाटवीं प्रविश्योपदेशं दत्तवान् गुल्मां
तरितेन पिशाचेन श्रुतं तस्यापि मुक्तिरभूत् प्रसंगेनाप्यात्मज्ञानान्मुक्तिरिति वाक्यार्थः अत्र विशेषमाह आवृत्तिर
सकृदुपदेशात् तीव्रवैराग्याणां श्रुतिमात्रान्मोक्षो भवतु मंदानां निरंतरोपदेशादावृत्तिः करणीया आख्यायिकांत
रमाह पितापुत्रवदुभयोर्दृष्टत्वात् कश्चिद्ब्राह्मणो भूरि स्वां गुर्विणीं भार्यां तस्मिन् गृहे निक्षिप्य प्रतिग्रहार्थं देशांत
रंगतो बहुना कालेन गृहार्थदेशांतरंगतो बहुना कालेन गृहमागतः पुत्रं दृष्ट्वा न ज्ञातवान् तन्माता भर्तारं पुत्रं च वि २७
ज्ञापितवती तत उभयोरपि ज्ञानमभूत् गुरुं विना सुहृदुपदेशादपि तत्त्वज्ञानं भवतीत्यर्थः आख्यायिकांतर

माह श्येनवत्सुखदुःखी त्यागवियोगाभ्यां केनापि पुंसा श्येनशावकः प्राप्तः खंडगुडादिना आहारेण सम्मानेन च पुष्टः काले
न योनन मवाय कथमहमेनं दुःखिनं करोमीति पुंसा वने त्यक्तः श्येनश्च बंधत्यागात्सुखी पुरुषवियोगात् दुःखीति दुः
खशबलत्वात् स्वस्थद्वयमिति आख्यायिकांतरमाह अहिनिर्ल्वयनीवत् निर्ल्वयनी निर्मोकः कश्चिदहिर्विवरद्वा
रेण निर्मोकं सत्कामममेदमिति धूलीयं च कापि दृष्ट्वा शोचति स्नेहाच्च न संयुक्तवान् निर्मोकानुसारात्केनाप्यहितुंडिकेन
गृहीतः ममत्वस्नेहादयो न कर्तव्याः आख्यायिकांतरमाह छिन्नहस्तवद्वा कश्चिन्मुनिर्भ्रातुराश्रमं प्रविश्य फलादि
कमाजहार भ्रात्रा पृष्टः स्तेयी त्वमिति तेनोक्तं प्रायश्चित्तं वद भ्रात्राप्युक्तं हस्तच्छेदादन्यत्प्रायश्चित्तं नास्तीति तेन च
राज्ञे निवेद्य स्वहस्तौ छेदितौ तस्मादकार्यं न कर्तव्यं प्रमादकृते च तन्निःकृतिरवश्यं कर्तव्येति आख्यायिकांतरमाह
असाधनानुचिंतनं बंधाय भरतवत् भरतो नाम नृपः प्रसापन्नमोक्षोपि तत्क्षणप्रसूतां हरिणीं दृष्ट्वा हरिणशावकं
पुपोष तं विहाय नान्यमना बभूव मरणसमये तद्गतमनाः प्राणांस्तत्याज तत्संगान्मुक्तिं नावाप अनिष्टचिंतनं कार्य
मित्यर्थः बहुभिर्मेलकं न कुर्यादित्याह बहुभिर्योगे विरोधो रागादिभिः कुमारीशंखवत् बहुभिः कलहोऽव
श्यं यथा कुमारीशंखानामन्योन्यं कंकणानां संघोषात् द्वाभ्यामपि न कुर्यादित्याह द्वाभ्यामपि तथैव सक
थनादिदोषात् आख्यायिकांतरमाह निराशः सुखी पिंगलावत् पिंगला नाम वेश्या स्वर्थं भुजंगागमनं

सांख्य० तप्रकृतेः स्वकार्यकरणे कादृष्टसहकारिता इत्यत्राह नैरपेक्ष्येपि प्रकृत्युपकारे ऽविवेको निमित्तं अदृष्टनैरपेक्ष्येपि प्रकृतेरावि
वेकः सहकारीति प्रकृतेः निवृत्तिं दृष्टांतेनाह नर्तकीवत्तस्यापि निवृत्तिश्चारितार्थ्यात् यथा नर्तकी परिषच्चारितार्थ्यान्न
त्यान्निवर्तते तथा प्रकृतिरपि पुरुषस्य विवेकचारितार्थ्यात्सर्गान्निवर्तते निवृत्तापि प्रकृतिः कुतोपि कारणात्प्रवर्तिष्यत
२६ इत्यत्राह दोषबोधेपि नोपिसर्पणं प्रधानस्य कुलवधूवत् स्वदोषविज्ञानाद्विवेके न प्रकृतेनोपिसर्पणं यथा कुलव
धूः परपुरुषेण दृष्टा न पुनस्तद्दर्शनं भविष्यतीत्यवहित्थां कुरुते कुरुते यस्य बंधस्तस्य मोक्षो न च पुरुषस्य तौ स्त इत्यत्राह
नैकांततो बंधमोक्षौ पुरुषस्य विवेकादृते प्रकृतिपुरुषाविवेकाद्बंधमोक्षाविति अभिमानमात्रमिति असत्यस्य सत्यपूर्वक
त्वात्कस्य बंधमोक्षौ सत्यौ इत्यत्राह प्रकृतिराजस्यात् ससंगत्वात्पशुवत् आजस्यात्तत्वतः संसंगत्वाद्गुणयोगात् य
थापशुः संगाद्गुणयोर्बध्यते तस्मात्प्रकृतेर्बंधमोक्षौ सत्यौ अविवेकिनं प्रति प्रवर्त्तनमेव बंधः मोक्षः पुनः विवेकिनं प्रत्य
प्रवर्तनं तेन च मस्वभावप्रच्युतिदोषइति केन रूपेण प्रकृतिरात्मानं बध्नातीत्याह रूपैः सप्तभिरात्मानं बध्नाति प्रधा
नं कोशकारवद्विमोचयत्येकेन रूपेण रूपैः सप्तभिः धर्मवैराग्यैश्वर्याधर्माज्ञानावैराग्यानैश्वर्यैर्बध्नाति विमोच
यति एकेन रूपेण ज्ञानेन कल्पाकल्पकर्मभ्यां भुक्तिमुक्ती श्चेति तत्त्यागे दृष्टहानिरित्यत्राह निमित्तत्वमविवेक
स्य न दृष्टहानिः अदृष्टस्य ज्ञानद्वारेण परंपरया कारणमविवेकस्तस्मान्न दृष्टहानिरिति विवेकः कथं स्यादित्याह २६

र्थमहानेन विना न सिद्धिः एवं तुष्टितोऽशक्तिहानेन विना न सिद्धिः एवं तत्स्थानेन विनेति सर्गे सति वैराग्यं कति सर्ग
भेदा इत्यत्राह देवादिप्रभेदाः आदिशब्दात्सर्वप्रभेदाः तथा देवादौ षड्विधश्च तस्यात्संसारः कर्मसंभवः सुरासुरनरनार
कतिर्यक्षु च तथा स्थावरादीनां नारकेषु तत्र्भावः प्रकृतेः प्रवृत्तिशीलत्वात्सर्वदा सृष्टेन मुक्तिरित्यत आह आब्रह्म
स्तंबपर्यंतं तत्कृते सृष्टिराविवेकात् तत्कृते पुरुषकृते मोक्षार्थं सृष्टिर्विवेकपर्यंतं प्रकृतेः शीलमिदं विवेकज्ञानं यावन्न
वर्त्तते स्वभावस्यानापाधित्वात्कुत्र कथं सृष्टिरित्यत्राह ऊर्ध्वं सत्त्वविशालः देवलोके नागलोके सृष्टिमाह तमोवि
शालो मूलतः पाताले मर्त्यलोके सृष्टिमाह मध्ये रजोविशालः विशालत्वमुद्रिक्तः न चैकैकसंगुणं नामन्योन्यमिथु ण
नाभावात् प्रकृतेः कथं सृष्टिवैचित्र्यमित्याह कर्मवैचित्र्यात्प्रधानचेष्टा गर्भदासो विचक्षणो विचित्रं कर्म कुरुते प्र
भोरर्थाय तथा प्रधानं पुरुषार्थं विचित्रां सृष्टिं कुरुते कर्मवैचित्र्यात्कर्मलाभात् उत्तरोत्तरभूमिलाभात्कृतार्थस्य किं
मोक्षेनेत्याह आवृत्तिस्तत्राप्युत्तरोत्तरयोः नियोगाद्धेयः उत्तरोत्तरविशिष्टजन्मलाभेपि संसारे आवृत्तिस्तस्माद्धेयः
संसारः एतदेवाह समानं जरामरणादिजं दुःखं आब्रह्मस्तंबपर्यंतं कारणे प्रकृतौ लयादेव कृतकृत्यस्य किं मोक्षे
णेत्यत आह न कारणलयात्कृतकृत्यता मानवदुत्थानात् श्रुतेः तथा वादश मन्वंतराणि हि तिष्ठंती द्रियचिंतकाः भौ
तिकास्तु शतं पूर्णं सहस्रं त्वाभिमानिकाः बौद्धा दशसहस्राणि तिष्ठंति विगतज्वराः पूर्णं शतसहस्रं तु तिष्ठंत्यव्यक्त

सांख्य० चिंतकाः निर्गुणंपुरुषंप्राप्यकालसंख्यानवियतेयथास्नानार्थंमग्नस्यपुनरुत्थानंतथाप्रकृतिलीनस्येत्यर्थः नित्य
त्वादात्मनोबंधस्तथाप्रधानस्यापीत्यत्राह अकार्यत्वेपितद्योगःपारवश्यात् अकार्यत्वमप्रयोजकंकिंतुपरतंत्रत्वं
२५ तच्चप्रकृतावस्तीतितद्योगाद्बंधोगः परात्मा किंरूपइत्यत्राह सहिसर्ववित्सर्वकर्त्ता प्रकृतिप्रतिबिंबितत्वादवम
भिमानः तात्त्विकमेवकर्तृत्वंभवतुकिंप्रतिबिंबकल्पनयातथाचन्यायाभिमतएवेश्वरोस्तीत्यत्राह ईदृशेश्वरसिद्धिः
सिद्धाः यद्यस्मादभिमतआत्मेश्वरोभवतुन्यायाभिमतमेवप्रमाणनास्ति एतेषप्रथमाध्यायेईश्वरासिद्धेरितिसू
त्रेवर्णितं द्वितीयाध्यायेपिमुक्तविमोक्षार्थमितिसूत्रे स्वार्थपारार्थ्येनप्रधानप्रवृत्तिरित्युक्तमत्रस्वार्थस्यगौणत्वं
परार्थत्वमेवाह प्रधानसृष्टिःपरार्थस्वतोप्यभोक्तृत्वादुष्ट्रकुंकुमवत् चेतनस्यापिप्रवृत्तिर्दृश्यते यथोष्ट्रःकुंकु
मंवहति अचेतनायास्तुकमन्यतरभोक्तृत्वासरार्थमेवप्रवर्तनमिति चेतनस्यप्रवृत्तिर्दृष्टानाचेतनस्येत्यत्राह
अचेतनत्वेपिक्षीरवच्चेष्टितंप्रधानस्ययथाक्षीरमचेतनंवत्सार्थंप्रवर्त्ततेतथाप्रधानंपुरुषार्थंप्रवर्त्ततेदृष्टांतांतर
माह कर्मवद्दृष्टेर्वाकालादेव यथाकृषीवलेनकृतंकर्मधान्यारोपादिकालादेयफलतिनचेयंक्षाश्चेतनाः आ
दिशब्दादृष्ट्यातं उष्ट्रस्यापिताडनादिभयाभिसंधानात्प्रवृत्तिर्दृश्यतेनाचेतनायाः प्रकृतेरभिसंधानमस्तीत्यत्राह
स्वभावाच्चेष्टितमनभिसंधानाद्भृत्यवत् यथागर्दभाःसभृत्याःस्वामिन्यभिमानरूपःस्वभावाच्चेष्टितमनभिसंधा २५

नाद्भृत्यवत् कार्यंकरोतितथाप्रकृतिः पक्षांतरमाह कर्माकृष्टेर्वाप्यनादितः अनादित्वात्संसारस्यधर्माधर्माकर्षणा
प्रधानंवर्त्तते यथापुंसांकर्मवशादेवाचेतनाअपिवृक्षाःफलंतीति युक्तिबहुत्वात्पुनरुक्तेर्नादोषायेत्यत आह विवि
क्तबोधात्सृष्टिनिवृत्तिःप्रधानस्यसूदवत्पाके पुरुषार्थंसृष्टिस्तन्निवृत्तिः प्रकृतिपुरुषविवेकज्ञानात् यथासूपका
रःपाकेकृतेनिवर्त्तते उपदेशाद्विवेकज्ञानेपिमुक्तिर्नदृश्यतइत्यर्थः इतरइतरवत्तद्दोषात् नयथाकथंचिद्बोधमा
त्रान्मुक्तिः किंत्विंद्रियादितरआत्मादुरतस्तथानंनजहातिध्यानादिनापृथक्करोतितद्दोषात्प्रकृतेश्चलत्वादिदोषद
र्शनान्मोक्षस्वरूपमाह द्वयोरेकतरस्यवाऔदासीन्यमपवर्गः द्वयोःप्रकृतेरौदासीन्यंविवेकिनंप्रत्यप्रवर्त्तनंपुरुष
स्यौदासीन्यंप्रकृतेस्तनभिषंगः एकतरस्यसागत्मनःतस्यैवमुख्यत्वात् प्रकृतेःप्रवृत्तिशीलायाऔदासीन्येसर्वमु
क्तिप्रसंगइत्यत्राह अन्यसृष्ट्युपरागेपिनविरज्यतेप्रबुद्धरज्जुतत्त्वस्यैवोरगः नप्रतिशीलायाऔदासीन्यंस्वभा
वात्सागदोषात् किंतुविवेकिनंकिंनंप्रत्यप्रवर्तनं ज्ञानप्रतिसृष्ट्युपरागेपिसृष्टिकारणेपिनविरज्यतेसृष्टौप्रवर्त्तते
यथारज्जोसर्पभ्रमेतप्रबद्धरज्जुतत्त्वस्यवोरगःसर्पभ्रमोनिवर्तते नत्वज्ञातरज्जुतत्त्वस्य अत्रन्यायामाह कर्मनि
मित्तयोगाच्च विवेकिनंप्रति कर्मणोनिमित्तस्याभावन्नवीजंविनांकुरोभवतिश्रुतिरपि भिद्यतेहृदयग्रंथिःछिद्यंते
सर्वसंशयाः क्षीयंतेचास्यकर्माणितस्मिन्दृष्टेपरावरे अदृष्टबुद्धिकार्यत्वादहंकारप्रकृतत्तोभवत्यदृष्टसहाया

नाद्धेन्मुक्तिः सैवोपास्या किमात्मनेति प्रकृत्याख्या एकातुष्टिः अंभइत्युच्यते विवेकख्यातादपिनसाक्षाद्दर्शना
त् व्रतग्रहणाद्भविष्यतीत्युपादानाख्यासलिलमुच्यते व्रतादपिनसाक्षात्किंतु कालाद्भवतीति काल
ख्यातृतीयातुष्टिरोघइत्युच्यते कालवशादपिनसर्वेषांमुक्तिः किंतुभाग्यादेवेतिभाग्याख्या चतुर्थीतु
ष्टिर्वृष्टिरित्युच्यते आत्मानमधिकृत्येत्याध्यात्मिकाः पंचधाविषयोपरमाद्बाह्याः पंचाविषयार्जनदुःखादुपरमे
एकातुष्टिः पारमुच्यते रक्षणदुःखादुपरमेद्वितीयातुष्टिः सुपारमुच्यते क्षयंभावयतोदुःखादुपरमेतृती
यातुष्टिः पारंपारमुच्यते भोगदोषंभावयतोदुःखादुपरमेचतुर्थीतुष्टिरनुत्तमांभउच्यते नानुपहत्यभूतानि
भोगसिद्धिरितिदुःखादुपरमेपंचमीतुष्टिरुत्तमांभउच्यते एवंनवधेतिसिद्धेर्भेदमाह ऊहादिभिः सिद्धिः अष्ट
धाऊहस्तर्केमननमित्येकासिद्धिस्तारमुच्यते शाब्दज्ञानंद्वितीयासिद्धिः सुतारमुच्यते अध्ययनंतृतीयासिद्धिः
रम्यंकमुच्यते बाह्यांतःशुद्धिः पंचमीसिद्धिः सदामुदितमुच्यते अध्यात्मिकदुःखविघातः षष्ठीसिद्धिः
प्रमोदमुच्यते आधिभौतिकदुःखविघातः सप्तमीसिद्धिः मुदितमुच्यते आधिदैविकदुःखविघातोऽष्टमीसि
द्धिः मोदमानसुधामुच्यते एवमष्टधेतिप्राधान्येनविपर्ययाशक्तितुष्टिसिद्धिरितिचतुःप्रकाराअवंतराभेदा २४
पंचाशत् उत्तरेणपूर्वपरित्यागात्सिद्धिमाह नेतरादितरहानेनविना इतराद्दशाशक्तेरितरहानेनविप

मंतिनचैवंभूतानीतिनदेहचैतन्यंदूषणांतरमाह प्रपंचमरणाद्यभावश्चदेहस्यचेतनत्वेप्रपंचस्यमरणस्या
भावः चेतनस्यनित्यत्वात् अथचेतनस्यापिमरणंमुक्तिरितिदूषणांतरमाह मदशक्तिवच्चेत्प्रत्येकपरिदृ
ष्टेसांहत्येतदुद्भवः यथामदशक्तिः प्रतिपुरुषसूक्ष्मत्वेनदृष्टासांहत्येमहत्त्वेनोद्भवाद्देहेपिलाम
पिवहंतिनचभूतेष्वपिप्रत्येकंसूक्ष्मंचैतन्यंदृष्टंयेनसांहत्येदेहेचैतन्यंस्यात् नसांसिद्धिकमितिसूत्रेनिषिद्ध
निषेधमुखेनप्रदर्शितंभवतिइहसूत्रेविधिमुखेनेतिनपुनरुक्तंवैराग्यादीनांपारंपर्येणमुक्तिसाधनत्वमुक्त
साक्षान्मुक्तिसाधनमाह ज्ञानान्मुक्तिः व्यक्तंव्यतिरेकमाह बंधोविपर्ययात् अज्ञानात् नज्ञानमात्रान्मुक्तिः
कर्मणोपिमुक्तिः कर्मणोपिमुक्तिसाधनत्वात् तथाचश्रुतिः तंविद्याकर्मणीसमन्वारभेतेपूर्वप्रज्ञाचेतित
त्राह नियतकारणत्वान्नसमुच्चयविकल्पौ नियतमेवकारणंज्ञानान्मुक्तिः कर्मणोमुक्तिः तत्राप्यकामक
र्मसमुच्चयः श्रूयतेतत्रापिज्ञानार्थत्वात्समान्नसमुच्चयेनापिकदाचित्कर्मणइतिविकल्पः श्रुतिश्च वेदाहमेतं
पुरुषंमहांतमादित्यवर्णंतमसःपरस्तात् तमेवविदित्वातिमृत्युमेतिनान्यः पंथाविद्यतेऽयनायदूषणांतरमा
ह स्वप्नजागराभ्यामिवमायिकामायिकाभ्यांनोभयोर्मुक्तिः पुरुषस्य मायिकः स्वप्नः अमायिकोजागरः स्व
प्नवत्कर्मजागरवत् ज्ञानंतुल्यकालयोर्हिसमुच्चयः नतुस्वप्नजागरयोस्तुल्यकालत्वात्तस्मान्नज्ञानाकर्म

सांख्य० २३

समुच्चयः प्रसत्राह इतरथापि नात्यंतिकं स्वप्नप्रत्ययस्यापि नात्यंतिकं मिथ्यात्वं खपुष्पवत् न चास्वात्मन्यपि मिथ्या
त्वं अन्यथा स्वप्न इवेवनस्यात् न चास्यतादृशे स्वप्नः किंतु जाग्रदृष्टेर्थे दृष्टे कारणभावात् संकल्पमात्रेण योगिनां न
सर्वसिद्धिरित्यत्राह संकल्पितेप्येवं नास्मदादीनां संकल्पात्सिद्धिरिति योगजधर्माय गृहीतानां सिद्धानामपि न
भावितव्यं तस्मान्न मिथ्येति तदेवाह भावनोपचयाच्छुद्धस्य सर्वं प्रकृतिवत् यथा महदादीनां पूर्वमपेक्ष्य कार्यकारणं
प्रकृतेस्तु न कार्यकारणे कस्याप्यपेक्षा तथादृष्टकारणाभावादपि योगिनां भावनोपचयात्सर्वं संपद्यते भावनार्थं ध्या
नमाह रागोपहतिर्ध्यानं रागाद्युत्तोगुणाच्चलितत्वं तदपहतिर्निश्चलितत्वं ध्यानं तत्सिद्धिः कथमित्यत्राह वृत्ति
निरोधात्तत्सिद्धिः वृत्तयः प्राणादयः पंच तन्निरोधात्तत्सिद्धिः तन्निरोधः कथमित्यत्राह धारणासनस्वकर्मणा तत्सि
द्धिः धारणं नाभ्यादिदेशे चित्तधारणं आसनं स्वस्तिकादि अनेन यमनियमप्राणायामप्रत्याहारा उपलक्षिताः स्वक
र्मस्वजातिविहितकर्मानुष्ठानमिति वृत्तिसिद्धिः नानासनेषु स्वमतमासनमाह स्थिरसुखमासनं येन स्थैर्यं सु
खं स्यात् तदासनमनुष्ठेयम् अन्यन्निरोधोपायमाह निरोधः छर्दिविधारणाभ्यां छर्दिः रेचकं विधारणं कुंभ
कं उपलक्षणं एतत् पूरकोपि द्रष्टव्यः किं तत्स्वकर्मेत्यत आह स्वकर्म स्वाश्रमविहितकर्मानुष्ठानं स्पष्टं अंत्यव
क्तिनिरोधस्योपायमाह वैराग्यादभ्यासाच्च वैराग्यं द्विविधं अपरं परमिति प्रतिसयात् ज्ञानप्रज्ञानप्रसादमा २३

त्रात् अभ्यासात्योनः पुण्येन ध्यानात् चः समुच्चये वृत्तीनामवांतरभेदमाह विपर्ययभेदाः पंच। अविद्या मिथ्या
ज्ञानं अस्मिता अभिमानः रागो अनुरागः द्वेषः क्रोधः अभिनिवेशस्त्रासः इति विपर्ययेण विषयि ज्ञानमुपलक्षय
ति अशक्तिमाह अशक्तिरष्टाविंशतिधा तुष्टिमाह तुष्टिर्नवधा सिद्धिमाह सिद्धिरष्टधा चतुर्णां विपर्ययभेदमा
ह आवांतरभेदाः पूर्ववत्पूर्ववदिति पूर्वाचार्येरुक्तं अष्टौ विपर्ययभेदाः प्रकृतिमहदहंकारपंचतन्मात्रेष्वात्म
बुद्धिरविद्या मः अष्टविषयत्वादष्टधा देवा ह्यणिमादिकमासाद्य तमभिमन्यंते सेयमस्मिता मोहोऽष्टविषयत्वा
दष्टधा शब्दादिषु तन्मात्रेषु पंचसु दिव्यादिव्यतया रागो महामोहो दशविषयत्वाद्दशधा शब्दादयो दश अणिमा
द्यष्टैश्वर्योपधानेन सहिताः ते चान्येनोपहन्यमाना इति द्वेषस्तामिस्रः अष्टादशविषयत्वादष्टादशधा देवा ह्यतान्नु
जाना असुरैरुपाहन्यंते इत्यभिनिवेशस्त्रासः अंधतामिस्रोऽष्टादशविषयत्वादष्टादशधा एवं द्वाषष्टिरिति अ
शक्तिभेदानाह एवमितरस्याः इतरस्या अशक्तेरेवमनेकधाष्टाविंशतिधा एकादशेंद्रियवधाः बाधिर्यकुष्ठि
तांधत्वजडत्वाऽजिघ्रातातथामूकताकौण्यपंगुत्वक्लैब्योदावर्तमुग्धता एतद्विषयाएकादशबुद्धेः नवतुष्टयः अ
ष्टसिद्धयः एतद्विपर्ययेण सप्तदशबुधेः एवमष्टाविंशतिरिति तुष्टिभेदानाह आध्यात्मिकादिभेदान्नवधा
तुष्टिः अनात्मन्यात्मबुद्ध्या प्रवर्तमाना आध्यात्मिकाश्चतस्रः आदिशब्दाद्बाह्याः पंच प्रकृतिविवेकदर्शि

त्वेपिमतस्यानादित्वस्यात्तत्वंमनआत्माभविष्यतीत्यत्राह अणुपरिमाणंतत्कृतिश्रुतेः मनोणुपरिमाणंतत्क्रिया
यांश्रुतिदर्शनात् व्यापकस्यनिरूपाध्येनेंद्रियत्वमित्युपाधिर्वक्तव्यः यदिकर्णशष्कुलीवन्नियततावच्छेदकस्योपाधि
त्वंतदानायन्मात्रेवृत्तिलाभोनान्यत्रेतिश्रोत्रवत्सर्वत्रतत्तत्स्वदेहमात्रमुपाधिर्वक्तव्यः तथाचतदावच्छेदेनवृत्ति
लाभेद्वित्रिमिमेवेदनापादेमेसुखमित्यव्याप्यवृत्तित्वप्रतीतिविरोधः युगपज्ज्ञानानुत्पत्तिरपिमनसोणुत्वमाह
न्यायश्चान्यत्रप्रपंचितइति हेत्वंतरमाहतदन्नमयत्वश्रुतेः तस्यमनसोऽन्नमयत्वेश्रुतिरस्ति अन्नमयत्वेनच
सोम्यत्वंदर्शितंसोम्यत्वंचचंद्ररूपत्वमितिन्यायात्माचंद्रः श्रुतिश्च अन्नंवैप्राणाःप्राणश्चचंद्रमामनसोजातः
तस्मादणुमनोनात्मेतिपुरुषार्थमहदादीनांप्रवृत्तिःसंसृतिः किमर्थमित्यत्राह पुरुषार्थंसंसृतिर्लिंगानांसूपका
रवद्राज्ञः यथाप्रवृत्तिस्तथासंसृतिः सृतौचमरणदुःखमितिनिर्विण्णोभवतिसूपकारवदितिपर्यंतमेवप्रवृत्तिः
विप्रतिपत्तौसत्सांख्यपक्षमाह पांचभौतिकोदेहः स्पष्टंकाचित्प्रतिज्ञेत्यत्राह चातुर्भौतिकमित्येके आकाश
परित्यागेनचातुर्भौतिकमित्यन्येमतांतरमाह एकभौतिकमित्यपरे पार्थिवंशरीरमितिदेहचैतन्यंनिरस्यति
नसांसिद्धिकंचैतन्यंप्रत्येकादृष्टेः यथापृथक्पृथक्कृतेषुचैतन्यादर्शनात्तत्स्वभावत्वेचैतन्यं अतएवमि २२
लितानांचचैतन्यंनाशंकनीयंजंतवोहिप्रत्येकंक्षुद्रजंतुसंयमनेशक्तिमंतोमिलिताश्चेहहस्तिनमपिसंय

म्यः क्लिष्टाक्लिष्टाः प्रमाणविपर्ययविकल्पनिद्रास्मृतयः प्रत्यक्षानुमानशब्दाःप्रमाणानिविपर्ययोमिथ्याज्ञानम
तद्रूपप्रतिष्ठंविकल्पउभयज्ञानंनिद्रातमोबलंविज्ञानंस्मृतिरपिज्ञानंस्मृतिरपिज्ञानंकिंत्वप्रमाणंक्लिष्टाः क्लेश
युक्तारजस्तमोमय्यः अक्लिष्टाःसत्वमय्योदग्धक्लेशाः वृत्तिनिवृत्तौमुक्तिरित्याह तन्निवृत्तावुपशांतोपरागःस्व
स्थः वृत्तिनिवृत्तौक्षपिताविद्यास्मितारागद्वेषाभिनिवेशाःस्वस्थःस्वरूपंलभतेदृष्टांतमाह कुसुमवच्चमणिः य
थाजपाकुसुमसंसर्गात्स्फटिकेलौहित्यंतदपगमात्स्फटिकःस्वरूपेणावतिष्ठतेतथासोपीतिकरणानांतुल्य
त्वात्सर्वदातुल्यरूपत्वेत्यत्राह पुरुषार्थंकरणोद्भवोप्यदृष्टोल्लासात् नतुल्यताकरणोद्भवानुद्भवाभ्यांविशेषात्
विशेषश्चादृष्टोल्लासात्बलवत्तरत्वात्दृष्टांतमाह धेनुवद्वत्साय यथाधेनुत्वेनतुल्यत्वेपिक्षीरिणीसावत्सं
पुष्णातिबाह्यांतरभेदात्कतिकरणानीत्यत्राह करणंत्रयोदशविधमवांतरभेदात् अंतर्बुद्ध्यहंकारमनांसि
बाह्यानिइंद्रियेषुकथंकरणत्वमित्यत्राह इंद्रियेषुसाधकतमत्वगुणयोगात्कुठारवत् यथासाधकतमत्वेनकु
ठारेकरणत्वंतथेंद्रियेष्वपीइति त्रयोदशकरणानांकार्यमाह द्वयोःप्रधानंमनोलोकवद्भृत्यवर्गेषु द्वयोर्बुद्धीयं
कर्मेंद्रिययोः प्रधानंमनः तदधिष्ठानादेवेषांप्रवृत्तेः यथालोकेभृत्येषुस्वामीयुक्तिमाह अव्यभिचारात् व्यक्ते
युक्त्यंतरमाह तथाशेषसंस्काराधारत्वात् नष्टेंद्रियाणामप्यस्तिसंस्कारदर्शनात्प्राधान्यमाह स्मृत्यानुमानाच्च

सांख्य० इंद्रियंविनास्मृतिदर्शनान्मनोनुमीयते आत्माधारःसंस्कारइत्यत्राह संभवेन्नस्वतः स्वतआत्मनोनसंभवेत्
कूटस्थनिर्गुणात् कारणत्वेतुल्येकिंनिबंधनोगुणप्रधानभावइत्यत्राह अपेक्षितोगुणप्रधानभावःक्रियावि
शेषात् स्पष्टंनिरनिसंधानान्नपरःपरार्थंप्रवर्त्ततइत्यत्राह तत्कर्मार्जितत्वात्तदर्थमभिचेष्टालोकचद्रेकवत्
२१ बुद्धिप्रतिबिंबितपुरुषकर्मार्जितत्वात्पुरुषार्थमभिचेष्टाप्रवर्त्तनंबुद्ध्यादीनांमनःप्रधानंमनोव्यापारेषुअहंका
रः अहंकारव्यापारेबुद्धिःयथालोकेग्रामाध्यक्षात् द्रव्याध्यक्षः श्रेष्ठः तस्मादपिराजेतितथामनोबुद्ध्यर्थंप्र
वर्ततइतिसर्वप्रधानाबुद्धिरितिसमानकर्मयोगे पुरुषार्थेतुल्यक्रियायोगेपिसर्वेषामितिलोकवद्दितिवदिति
वि वीय्याध्यायसमाप्तौ इतिकौलसांख्यप्रवचनसूत्रवृत्तौप्रधानकार्याध्यायोद्वितीयः २ प्रधानकार्यनिरूप
णानंतरंवैराग्यार्थंतृतीयाध्यारंभः अविशेषाद्विशेषारंभः अविशेषात्स्थूलात्सूक्ष्माद्विशेषस्यमहाभूतस्यारंभः
तस्माच्छरीरस्यैतस्यमांसादिमयविचारान्निर्विद्यते उत्पत्तिदर्शितानाशःकुतोस्यतआह तद्बीजात्संसृति
स्तत्राश्रान्नाशः तस्यस्थूलारंभस्यकारणाद्धर्माधर्मात्संसरणंधर्माधर्मनाशात्संसृतिनाशःभूतानामारंभक २१
स्वभावत्वेसर्वदारंभादनिर्मोक्षइत्यत्राह अविवेकाच्चप्रवर्त्तनमविशेषाणांविवेकज्ञानपर्यंतमविवेकस्वभा
म

वत्वंभूततन्मात्राणां आविवेकिनंप्रत्यारंभत्वेमहाप्रलयेपितंप्रत्यारंभकत्वं अनारंभत्वेतुकुतोविशेषादविवेकि
नंप्रतिपुनरारंभकत्वमित्यत्राह संप्रतिपरिष्वक्तोद्वाभ्यांधर्माधर्माभ्यांगमागमपरिष्वंगीप्रलयेपिधर्मानुबद्धआ
त्मातितंप्रतिपुनरारंभःमुक्तोनतथेतिनित्यत्वेतुमुक्तःकथंपारतंत्र्यमित्यत्राह मातापितृजंस्थूलंप्रायशइतरन्नतथा
प्रायशइतिदृश्यत्वादितरत्सूक्ष्मशरीरंनतथादुरूहत्वात् द्वयोर्देहयोःकस्यभोगइत्यत्राह पूर्वोत्पत्तेस्तत्कार्यत्वंभो
गादेकस्यनेतरस्य पूर्वोत्पत्तेःसूक्ष्मशरीरस्यभोगादेकस्यतस्यनेतरस्यस्थूलस्यतत्कार्यत्वंस्थूलसरीरस्यगौ
णोभोगःमृतशरीरेभोगादर्शनात् कतिभिस्तत्त्वैःसूक्ष्मशरीरंभइत्यत्राह सप्तदशैकंलिंगं सप्तदशएकंअष्टा
दशैर्लिंगंसूक्ष्मदेहउत्पद्यते बुद्ध्यहंकारमनांसिपंचसूक्ष्मभूतानिदशेंद्रियाणिइति सूक्ष्मदेहस्यसर्वत्रतु
ल्यतात्कथंपुत्तिकाहस्तिदेहानांविसदृशानांतस्मादुत्पत्तिरित्यत्राह व्यक्तिभेदःकर्मविशेषात् व्यक्तं यथात्मा
त्यानेकथंदेहेऽहमितिअभिमानइत्यत्राह तदधिष्ठानाश्रयेदेहेतद्वादात्तद्वादः आत्माधिष्ठानाश्रयेदेहेभो
गादात्मवादादेहेहमित्यभिमानवादः अत्रदृष्टांतमाह नस्वातंत्र्यात्तदृते छायावच्चित्रवच्च यथात्मनोविनादे
हेहमितिप्रत्ययस्तदात्मत्वेदेहेऽहमितिप्रत्ययः स्यात्तन्नचैवं यथाचरकेणविनानच्छायाभित्तिंविनानचित्रं त
थात्रापिसूक्ष्मदेहएवात्माभविष्यतीत्यत्राह मूर्त्तत्वेपिनसंघातयोगात्तरणिवत् तरणिवदितियथाप्रकाश

सांख्य०

२०

प्रमाणदृष्टस्यस्पष्टं मनसोलक्षणमाह उभयात्मकंमनः बुद्धींद्रियात्मकं कर्मेंद्रियात्मकं मनोधिष्ठानादुभयप्रव
तेः कथमेकस्मादहंकारादनेकानींद्रियाणीत्युत आह गुणपरिणामभेदान्नानात्वमवस्थावत् धर्माधर्मसह
कारिसत्वादिगुणपरिणामभेदादनेकानियथैकस्यदेहस्यबाल्ययौवनवार्द्धकानीति उभयेंद्रियविषयमाह रूपा
दिरसवर्गांतउभयोः बुद्धींद्रियकर्मेंद्रिययोः बुद्धींद्रियस्यविषयारूपरसगंधस्पर्शशब्दाः कर्मेंद्रियस्यवि
स्यविषयावचनविहरणादानानंदरसपरिणाममात्रमलानि आत्मेंद्रिययोर्वैधर्म्यमाह द्रष्टृत्वादिरात्मनःकरण
त्वमिंद्रियाणां व्यक्त अंतःकरणत्रयाणांत्रयाणामन्योन्यवैधर्म्यमाह त्रयाणांस्वालक्षण्यं महदहंकारमन
सांस्वालक्षण्यं स्वंस्वंलक्षणंमहतोध्यवसायः अहंकारस्यअभिमानःमनसःसंकल्पइति एषांसाधर्म्य
माह सामान्यकरणवृत्तिः प्राणाद्यावायवः पंचप्राणाद्यावायवस्त्रिभिःकरणैर्धार्यंते करणानांवृत्तीरा
ह क्रमशोऽक्रमशश्चेंद्रियवृत्तिः क्रमशश्चंद्रालोकेचौरंदृष्ट्वा इंद्रियेणवस्तुविचारयति ततश्चोरोयमि
तिमनसासंकल्पयति ततोधनंगृह्णाम्यहंकारेणाभिमन्यते ततश्चौरंगृह्णामीबुद्ध्याध्यवस्यति अक्रमश्च २०
रात्रौविद्युदालोकेव्याघ्रंदृष्ट्वाझटिति अपसरति तत्रचतुर्णामेकदावृत्तिः यद्यपिवृत्तीनामेकदासंभवास्तत्रा
पिक्रमएवतथाप्युत्पलशतपत्रवृत्तिभेदवद्भासनादक्रमइत्युक्तमितिकतिवृत्तयइत्यत्राह वृत्तयःपंचत

र

तिः पुत्रैषणायाश्चवित्तैषणायाश्चलोकैषणायाश्चव्युत्थायाथभिक्षाचर्यंचरंतीतिश्रांतोदांतउपरतस्तितिक्षुःसमाहितो
भूत्वात्मन्येवात्मानंपश्यति यदिवैराग्यान्वेषणानंतरंमोक्षस्तदासर्वेषांगुरूपदेशानंतरंमोक्षःस्यात् नचैवंदृश्यतेइत्य
त्राह नश्रवणमात्रात्तत्सिद्धिरनादिवासनायद्बलात् नश्रवणानंतरंमोक्षःकिंतुयस्यानादिवासनापटुःतस्याक्षिप्रमुक्तिः
अन्यस्यचिरमितियुक्तंतरमाह बहुभृत्यवद्वाप्रत्येकं यथैकस्यबहवोभृत्याआराधनायस्युः केचिन्मुच्यंतेकेचि
त्प्रसादमाजः केचिद्बध्यंते तथाप्रकृतिरेकापुरुषाश्चबहवोभृत्याइतियेषांस्पष्टंविवेकज्ञानंतेषांशीघ्रं येषामुपा
सनामात्रंतेषांक्रमेणअन्येषांनास्त्येव कूटस्थत्वादात्मनोबंधोनास्त्येवेत्यत्राह प्रकृतिवास्तवेचपुरुषस्याध्याससि
द्धिः यंप्रत्यात्मानंदर्शितवतीतंप्रतिकेप्रैतरप्रवर्त्तनंमोक्षःयंप्रतिप्रवर्ततेतंप्रतिपुरुषछायापत्तिरेवाध्यासः नतावि
क तयाचयथामामलिनोक्षवस्थोविकारीस्यात्स्वभावः नहितस्यभवेन्मुक्तिर्जन्मांतरशतैरपि अत्रप्रमाणंदर्शय
ति कार्यतस्तत्सिद्धेः प्रकृतिकार्याणांमहदादीनामविच्छेददर्शनात्तत्कर्तृत्वेधसिद्धिः प्रकृतेः प्रवृत्तिस्वभावत्वात्सर्व
पुरुषान्प्रवर्तयेत् किंविवेकाविवेकदर्शनेनेत्यत्राह चेतनोद्देशान्नियमः कंटकमोक्षवत् यथाकंटकंदृष्ट्वाकश्चित्क
श्चिन्निषेधति अनेनवर्त्मनामागाः नसर्वान्प्रतितथाधिकारातनविशेषोद्देशात्प्रवर्तनंनसर्वंप्रतीतिनियमः नात्म
नोबंधइत्युक्तंतदाह अन्ययोगेपितत्सिद्धिर्नाञ्जस्येनायोदाहवत् प्रवर्त्तकत्वकत्वमेवप्रकृतेर्वेधायप्रकृतियोगेपि

तच्छायापत्त्यापुरुषस्यबंधाभिमानसिद्धिः नांजस्येननतत्त्वतः अयोदाहवदिति यथासंप्रलोहयोगात्लोहोदहतीति
मन्यते वह्नेर्लोहस्यदाहकत्वं किंतु संयोगादग्नेरेवेति मर्थस्सृष्टिरित्यत्राह रागविरागयोर्योगः सृष्टिः रागाद्युक्तिः
परमार्थतस्तुरागादपिभोगेविषयदोषदर्शनाद्वैराग्यमेवेति प्रथमाध्यायेसत्त्वरजस्तमइत्यादिसूत्रेपंचविंशतितत्त्व
मुक्तंइदानीसप्रपंचंक्रममाह महदादिक्रमेणपंचभूतानां सृष्टिरितिक्रमंवक्ष्यति किंस्वार्थपरार्थंवेत्यत्राह
आत्मार्थत्वात्सृष्टेर्नैषामात्मार्थआरंभः पुरुषार्थत्वात्सृष्टेर्नैषांमहादीनामात्मार्थआरंभः नित्यत्वात्तत्कृतेःस्वार्थ
रंभोयुक्तः महादादीनांतुकारणलयेननाशात्सृष्टिमात्रामिति दिक्कालौ मित्यौकथंगणनायांनश्रुतावित्यत्राह
दिक्कालावाकाशादिभ्यः तत्तदुपाधिभेदादाकाशमेवदिक्कालशब्दवाच्यंतस्मादाकाशांत्वभूतौ आदिशब्दश्चसंख्या
नायातः सप्तम्यर्थेपंचमीमहत्तोबुद्धेर्लक्षणमाह अध्यवसायोबुद्धिः एवमेवेतिनिश्चयोध्यवसायः धर्माधीनां
कांतर्भावइत्यत्राह तत्कार्यंधर्मादिः धर्मज्ञानवैराग्यैश्वर्याणितत्कार्यत्वेनात्मधर्मत्वंनिरस्तंकार्यकारणयोरभे
दादंतर्भावोदर्शितः तस्याविशेषमाह महदुपरागाद्विपरीतं अधर्माज्ञानावैराग्यानैश्वर्याणिदृष्टोहिसहका १९
रिभेदात्कार्यभेदः यथावेत्रवीजस्यवेत्रांकुरजनकत्वंवह्निसंयोगसहकारिणोकदलीकांडजनकत्वंतथा
सत्त्वसहकारिणोमहतोधर्मादिजनकत्वंतमस्सहकारिणोऽधर्मादिजनकत्वमिति क्रमप्राप्तमहंकारादिलक्षण

माह अभिमानोऽहंकारः अहमितिअभिमानः तस्यकार्यमाह एकादशपंचतन्मात्रंतत्कार्यंएकदशेंद्रियाणिपं
चतन्मात्राणिषोडशकंतत्कार्यंकथमेकस्मात्कारणादनेकप्रकारोभवतीत्यत्राह सात्त्विकमेकादशकंप्रवर्ततेवै
कृतादहंकारात् महाविद्विकारादहंकारात्सात्त्विकंसत्त्वसहकृतमेकादशमेकादशेंद्रियंप्रवर्तते तमःसहकृतंतन्मा
त्रं इंद्रियत्रैविध्यमाह कर्मेंद्रियबुद्धींद्रियैरांतरमेकादशकं कर्मेंद्रियैर्वागादिभिः पंचभिर्बुद्धींद्रियैर्घ्राणादिभिः
पंचभिस्सहांतरंमनइत्येकादशकमिंद्रियं भौतिकानींद्रियाणीतितन्निषेधार्थमाह अहंकारिकत्वश्रुतेर्नभौ
तिकानि तत्रचेतनाचाधाधादिस्यर्थः युक्त्यंतरमाह देवतालयश्रुतेर्नारंभकस्य कारणेकार्यलयइतिस्थितं आ
दित्यंचैवचक्षुर्गच्छतादितिदेवेलयः श्रूयते तस्मान्नारंभकस्यनारंभकोभिमतस्यकारणत्वमिति नित्यानींद्रियाणी
तिकेचित् तत्परिहारार्थमाह तदुत्पत्तिःश्रूयतेविनाशाच्च अहंकारादुत्पत्तिः श्रूयते उत्पन्नस्यविनाशोवश्यंभा
वीति चक्षुरादीनांदर्शनादेंद्रियकानींद्रियाणीतितन्निषेधयति अतींद्रियमिंद्रियंभ्रांतानामधिष्ठाने भ्रांताना
मधिष्ठानेचक्षुर्गोलिकादाविंद्रियज्ञानं अन्यथाछिन्नकर्णस्यश्रवणानुपपत्तिः पाटलचक्षुषोरूपग्रहणप्रसं
गः एकमिंद्रियमुपाधिभेदान्नानात्वमित्यत्राह शक्तिभेदसिद्धोनेकत्वं भवतूपाधिभेदः शक्तिभेदस्त्ववश्यं
कल्प्य सत्त्वसत्त्वइतिनानात्वमपिसत्त्वएकत्वेनेवोपपत्तौबहुत्वकल्पनागुर्वीत्यत्राह नकल्पनाविरोधः

सांख्य० च दुःखशबलत्वात्सुखस्यापि दुःखपक्षे निक्षेपाद्वैराग्यमेवोपजायते तच्चतुर्विधं यतमानसंज्ञाव्यतिरेकसंज्ञा एकेंद्रि
यसंज्ञा वशीकारसंज्ञा चेति हेयं दुःखमनागतमेकविंशतिप्रकारं शरीरं षडिंद्रियाणि षड्विषयाः षट् बुद्धयः सुखं
दुःखं चेति तत्र शरीरं दुःखायतनत्वात् दुःखं इंद्रियाणि विषया बुद्धयश्च तत्साधनभावात् सुखं दुःखानुषंगात् दुःखं
१८ यातनापीडासंतापात्मकं मुख्यं चेति तस्य निवर्त्तकमसाधारणकारणमविद्या तत्स्थे धर्माधर्मौ चेति अविद्या विपरीत
ज्ञानं तत्संस्कारश्च बिद्वद्भिरुक्तः स्त्र्यादीनामसाधारणो हेतुः दुःखहानं च दुःखोत्पत्तिनिवृत्तिरात्यंतिकी तस्योपा
यस्तु ज्ञानमात्मविषयं ततोऽविद्यायानिवृत्तेः तथा चोक्तं आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मंतव्यो निदिध्यासितव्यः
श्रोतव्यः श्रुतिवाक्येभ्यो मंतव्यश्चोपपत्तिभिः मत्वा च सततं ध्येय एते दर्शनहेतवः तरति शोकमात्मविदिति सद्विवि
धः परश्चापरश्चेति तथा चोक्तं द्वे ब्रह्मणी वेदितव्ये परं चापरमेव चेति विद्यैश्वर्यविशिष्टः संसारं धूयाहि विवा
दाध्यासितमुपलब्धसत्कारणकं अभत्वाभावित्वात् चित्तवदित्यनुमानं ततः सामान्येनावमतस्य योगेन विशेष
तो ज्ञानं अपरस्य च जीवस्य स्वानुभावादेव सिद्धिः तयोश्च परापरयोर्विवेकेन ज्ञानाय प्रकृतिः तत्र परार्थता वक्ष्य
ते स्वार्थं च यं पुरुषं प्रयासानं विवेकेन दर्शितवती तं प्रत्युदास्ते अचेतनायाः प्रकृतेः प्रथमं प्रवृत्तिः दृष्टमचेत १८
नानामपि वत्साणां फलादिद्वारेण प्रवृत्तिरिति अथ के मोक्षाधिकारिण इत्यत्राह विरक्तस्य तत्सिद्धेः तथा च श्रु

श्रुत्यास्ति धर्मस्य नापलापस्तत्प्रत्यक्षबाधात् असंगो ह्ययं पुरुष इत्यादिश्रुतिः गुणयोगे सा बाधिता स्यात् दूषणां
तरमाह सुषुप्त्याद्यसाक्षित्वं यथात्मा जडः स्यात् सुषुप्त्यादौ असाक्षित्वमज्ञातत्वं स्यात् न चैवं सुखमहमस्वा
प्समिति प्रतिभासनात् आदिशब्दात्स्वप्नग्रहणं एक एवात्मेति वेदांतिनः तथा च नित्यः सर्वगतो ह्यात्मा कूटस्थो
दोषवर्जितः एकः स भिद्यते शक्त्या मायया न स्वभावतः अत्राह जन्मादिव्यवस्थातः पुरुषबहुत्वं यद्येक आत्मा ए
कस्मिन् जायमाने सर्वे जायेरन् परमतमाशंकते उपाधिभेदेप्येकस्य नानायोग आकाशस्येव घटादिभिः यथै
कमाकाशं घटाद्युपाधिभेदात् घटे नष्टे घटाकाशं नष्टमिति व्यपदिश्यते तथैकात्मपक्षेपि देहावच्छेदात्तन्नाशे आ
त्मा नष्ट इति व्यपदेशमात्रं नानात्मपक्षेप्यन्यथात्मनो नित्यत्वात् कथं जन्ममरणव्यवस्थेति समाधानमाह उपाधि
र्भिद्यते न तु तद्वान् उपाधिर्भिद्यते न चान्यनाशादन्यत्र नाशव्यवहार इति प्रसंगात् एकात्मपक्षे बद्धमुक्त एव विरु
द्धधर्माध्यासः एकस्य बंधमोक्षाभावात् आकाशस्य तु धूमादिधूमादियोगायोगाच्च विरुद्धोसंयोगस्याव्या
प्यवृत्तित्वात् एतेन किं स्यादित्यत आह एवमेकत्वेन परिवर्तमानस्य न विरुद्धधर्माध्यासः न विरुद्धधर्माध्या
सो भवति अन्यधर्मस्याप्यन्यत्रारोपो दृष्टो यथा यथा प्रकृतेः कर्तृत्वं पुरुषे न्यत्रेत्यत्राह अन्यधर्मत्वेपि नारोपात्
तत्सिद्धिरेकत्वात् तत्र पुरुषे कर्तृत्वं भ्रांत पुरुषाकर्तृत्वस्य सत्त्वादारोपस्यासत्यत्वात् न च सत्यासत्ययोः सं

बंधः तात्त्विको भवति असंगित्वात् आत्मनो न जन्ममरणादिसंभवति एवं श्रुतिविरोधः स्यात् तथा चैकमेवाद्विती
यं ब्रह्म नेह नानास्ति किंचन मृत्योः स मृत्युमाप्नोति य इह नानेव पश्यति अत आह नाद्वैतश्रुतिविरोधो जाति
परत्वात् व्यक्तं न त्वनेकात्मवादिनोपि एकस्यात्मनो बंधमोक्षौ विरुध्यावित्यत्राह विदितबंधकारणस्य दृष्ट्यात
द्रूपं विदितं बंधकारणं प्रकृतिपुरुषाविवेकदर्शनं यस्य तस्य दृष्ट्या विवेकज्ञानेन तद्रूपं कैवल्यरूपं विवेकाद
र्शनमिति नो बंधो न तात्त्विकः दर्शनादर्शनं निवर्त्तत इति मुक्तिः एवं चैकात्म्यपक्ष एवं न्याय्य पश्यामो न नानात्म
क इत्याह नांधोऽदृष्ट्या चक्षुष्मतामनुपलंभः अंधो न पश्यतीति चक्षुष्मानपि किं नोपलभते नानात्मवादिन
मनेके न्याय्याः संतीत्यर्थः इतोपि नानात्मान इत्याह वामदेवादिमुक्तो नाद्वैतं पुराणादौ श्रुतं वामदेवो मुक्तः शु
को मुक्त इत्यादि यद्येक एवात्मा एकमुक्तौ सर्वमुक्ते भेदश्रुतिबाधा स्यात् नानात्मपक्षेऽनादौ संसारे कदापि
कोपि मुच्यत इति क्रमेण सर्वमुक्तौ सर्वशून्यता स्यात् एकात्मपक्षे तु उपाधिविगमपवमोक्ष इत्यत्राह अनादाव
द्य यावदभावाद्भविष्यदप्येवं अनादौ संसारेऽद्य यावच्छून्यताया अदर्शनात् भविष्यति मुक्तिरिति पक्षे नास्ति प्र
माणं समाधानंतरमाह इदानीमिव सर्वत्र नात्यंतोच्छेदः अनंतत्वादात्मनां क्रमेण मुक्तिरपि स्यात् संसारोच्छे १७

दोपि न स्यात् संसारोच्छेदोपि न स्यात् इदानीं च सर्वत्र भविष्यत्कालेपि मुक्तिर्भविष्यतीनात्यंतोच्छेदोस्य प्रवाहनि
त्यत्वात् उपाधिविगमान्मोक्ष इति पक्षे सर्वशून्यताप्रसंग इति तुल्यो नुयोगः यथा नानात्मनां क्रमेण मुक्तौ सर्वो
च्छेदः तथा कर्मोच्छेदे सर्वोपाधिनाशाज्जगच्छून्यं स्यात् अथोपाधीनामनंतत्वान्न शून्यता नानात्मपक्षे तुल्यत्वं
तथा च अत एव हि विद्वत्सु मुच्यमानेषु सर्वदा ब्रह्मांडजीवलोकानामनंतत्वाच्छून्यता किमात्मा स्वभावो मुक्तो वा बद्ध
त्वे स्वरूपस्याप्रच्यवनान्निर्मोक्षः प्रच्यवे ऽनित्यत्वं मुक्तत्वे व्यर्थो ध्यानादिरित्यत आह व्यावृत्तोभयरूपः न बद्धो
नायं मुच्यते किं तु नित्यमुक्तः अज्ञानबाधार्थं ध्यानादिना क्रियत इति आत्मनः साक्षित्वमुक्तं प्राप्तविवेकस्यापि
साक्षित्वे ऽनिर्मोक्ष इत्यत्राह साक्षात्संबंधात्साक्षित्वं अक्षमिंद्रियं तत्संबंधात्साक्षित्वं विवेके च नेंद्रियसंबंध इ
त्यत आह नित्यमुक्तत्वमस्य औदासीन्यं चेति व्यक्तं आत्मनः कर्तृत्वं श्रूयते तत्कथमित्यत आह उपरागात्कर्तृत्वं चि
त्सान्निध्यात् चित्सान्निध्यात् चित्सान्निध्येन प्रकृत्युपरागादात्मनः कर्तृत्वं कर्तृत्वाभिमानः चित्सान्निध्यादिति वी
प्सा परिसमाप्तौ श्रुतौ तथा दृष्टत्वादिति इति श्री कपिलसांख्यप्रवचनसूत्रवृत्तौ विषयाध्यायः प्रथमः १ अथ वि
षयनिरूपणानंतरं प्रधानकार्यनिरूपणार्थं द्वितीयारंभः विमुक्तमोक्षार्थं स्वार्थं वा प्रधानस्य स्वभावविमुक्त आ
त्मानस्याभिमानिकविमोक्षार्थं प्रधानस्य जगत्कर्तृत्वं दुःखत्रस्तो स्वभावाद्वैराग्यान्मोक्षे वै पुरुषः प्रवर्तते सुखस्पृष्टो

सांख्य० शरीरादिव्यतिरिक्तः पुमान् व्यक्तमत्रन्यायमाह संहतपरार्थत्वात् यत्संहतं तत्तदसंहतपरार्थं संहतपरार्थत्वेनचव्यवस्था
स्यात् संहतत्वंच गुणानामन्योन्यमिथुनभावेनकार्यकारणं अथवाद्व्यकठिनतासंहतत्वं तत्र प्रकृत्यादौ तिरो
भूतमस्ति अन्यथा तत्कार्येषु संहततादर्शनप्रसंगात्तदेवस्पष्टयति त्रिगुणादिविपर्ययात् पुरुषस्त्रिगुणादिविपर्यया
३६ त् तददर्शनात् आदिशब्दादन्येषां प्रकृतिधर्माणामप्यदर्शनादिति न्यायांतरमाह अधिष्ठानाच्चेति चेतनोध्य
धिष्ठाता भवति प्रकृतिश्च जडेत्यर्थः युक्त्यंतरमाह भोक्तृभावात् भोग्या प्रकृतिः भोक्ता पुरुषः यद्यपि कूटस्थत्वा
दात्मनोभोक्तृत्वं नास्ति तथापि बुद्धिच्छायापन्नत्वसिद्धं मोक्षार्थप्रवृत्तिः सा किमात्मनः प्रकृतेर्वा इत्यत आह कैवल्या
र्थं प्रकृतेः त्रिगुणस्वभावत्वात्प्रकृतेर्नस्वभावप्रच्यवः अनित्यत्वप्रसंगाच्च यस्योपाधिका गुणास्तस्य कैवल्यं
संभवतिसच्चात्मेति स किं रूप इत्यत आह जडप्रकाशायोगात्प्रकाशः जडो न प्रकाशत इति सिद्धं यद्यात्मापि जडः
स्यात्तस्याप्यन्येन प्रकाशेन भवितव्यं लाघवाच्चात्मैव प्रकाशरूपोस्तु श्रुतिश्च येनेदं सर्वं विजानाति तं केन विजा
नीयाद्विज्ञातारमरेकेन विजानीयादिति जडोप्यात्मास्तु विधर्मातिन ज्ञानस्य काश्यस्त्विति नतु चिद्रूप इत्यत आह ३६
निर्गुणत्वान्नचिद्धर्मा यद्यात्मनो धर्मयोगः स्यात्सुपरिणामित्वं स्यात् ततश्चानिर्मोक्ष इति अत्र श्रुतिविरोधमाह

नाशः कारणलयः मुद्गराभिघातात्घटस्य कारणेलयः तन्निबंधनो नाश इति शब्दार्थक्रियाभेदो यदि लयः पुनरुद्भ
वो दृश्येतनन्वदृश्यत इति मूढैर्नदृश्यते विवेकैर्दृश्यत एव तथाहि तंतोर्नष्टस्य मद्रूपेण परिणामः मदश्च कार्पासवृक्ष
णपरिणामः तस्य पुष्पफलतंतुरूपेण परिणामः एवं सर्वे भावाः किमभिव्यक्तिः सती यासती चेन्नित्यं सत्कार्योपलब्धि
स्यात् असती चेत् सत्कार्यहानिः तस्यापि अभिव्यक्तिरन्या तस्याप्यन्येत्यनवस्थाइत्यत आह पारंपर्यतोन्वेषणा
द्बीजांकुरवत् भवत्वभिव्यक्तिसहस्रं तथा न दोषो नादित्वाद्बीजांकुरवदिति युक्त्यंतरमाह उत्पत्तिवद्वाप्यदोषः कि
मुत्पत्तिरुत्पद्यते नवा उत्पद्यते चेत् अस्या उत्पत्तिरित्यनवस्था नोत्पद्यते चेत् किमसत्वान्नित्यत्वाद्वा यद्यसत्वात् क
दाचिदप्युत्पत्तिर्नास्तीति सर्वदानुपलंभः स्यात् अथ नित्यत्वात्सर्वदा कार्योत्पत्तिः स्यात् अथोत्पत्तेः स्वयमेवो
त्पत्तिरूपत्वात् किमुत्पत्त्यंतरकल्पनया तर्हि अभिव्यक्तेरप्यभिव्यक्तिरूपत्वात् किमभिव्यक्त्यंतरकल्पनया इति
तुल्यं तत्रयस्तववसिद्धांतः सोस्माकमपि प्रकृतिकार्याणामन्योन्यं साधर्म्यमाह हेतुमदनित्यमसक्रियमनेक
माश्रितं लिंगं हेतुमत्कारणवत् अनित्यं विनाशि सक्रियमुपात्तं देहं संजति शरीरादयश्च स्पंदंते अनेकं
पुरुषभेदात् आश्रितं स्वकारणे लिंगं स्वकारणे लयं गच्छतीति यदि पंचविंशति तत्वं किं ज्ञानसुखादीनां सा

सांख्य०

१५

मान्यकर्मणामभावएवतथाचदृष्टपुरिसागइत्यतआह आंजस्यादभेदतोवागुणसामान्यादेस्तत्सिध्धिःप्रधानव्य
पदेशाद्वा आंजस्यात्स्वरूपतःचतुर्विंशतितत्वादभेदतस्तल्लक्षणयोगाद्गुणसामादीनांतत्सिद्धिस्तेषुचैवांतर्भावात्सिद्धिः
वाशब्दःपक्षांतरंसूचयति प्रधानव्यपदेशाद्वागुणादीनापारंपर्येणप्रधानकार्यत्वेनकार्यकारणयोरभेदात प्रधा
नकार्यत्वेनकारणयोरभेदात प्रधानव्यपदेशात् एवगुणादिसिद्धिर्नत्वभावादननुकीर्तनंप्रकृतिकार्ययोःसाध
र्म्यमाह त्रिगुणाचेतनत्वादिद्वयोः त्रिगुणमचेतनंआदिशब्दात्परार्थत्वंद्वयोरितिकार्यकारणयोःप्रकृतिभागस्य
त्रिगुणस्यान्योन्यवैधर्म्यमाह प्रीत्यप्रीतिविषादाद्यैर्गुणानामन्योन्यंवैधर्म्यंप्रीतिःसुखंआदिशब्दाल्लघुप्रकाशकं
सत्वंअप्रीतिःदुःखंआदिशब्दादुपष्टंभकंचलंरजःविषादोमोहआदिशब्दाद्गुरुवरणकंतमः तेषांवैधर्म्यकथ
नावसरेसाधर्म्यमाह लघ्वाद्यादिधर्मैरन्योन्यंसाधर्म्यंवैधर्म्यंगुणानांलघुवलनगुरुवैरनेनवैधर्म्यमुक्तं
आदिशब्दात्साधर्म्यंसूचितं तच्चपुरुषार्थत्वंअन्योन्याभिभवजननमिथुनवृत्तित्वंहेतुमदादीनांमहदादीनांका
र्यत्वमुक्तं तत्रप्रमाणमाह उभयान्यत्वात्कार्यत्वंमहदादेर्घटादिवत् प्रकृतिपुरुषयोर्नित्ययोरन्यत्वाच्चैवव्यक्तं
हेतुत्त्वंतत्तमाह परिणामात् परिमितत्वात्अपरांयुक्तिमाह समन्वयात् प्रधानेनसहसम्यगन्वयात् प्रधा
नगुणानांसर्वपदार्थेषुदर्शनात् तदेवाह शक्तितश्चेति कारणशक्त्याकार्यप्रवर्त्ततेइतिमहदादयःक्षीणाः १५

संतःप्रकृत्यनुपूरेणकार्यंजनयंति अन्यथाप्रकृतिलीनत्वात् सर्वदा कार्यंजनयेयुः व्यतिरेकमाह तथानेप्रकृ
तिःपुरुषोवा कार्यमकार्यंच कोटिद्वयंकार्यताहानेप्रकृतौपुरुषेवामहदादीनांप्रवेशइति उभयकोटिविनिर्मुक्ता
एवमहदादयोभविष्यंतीत्यतआह तयोरन्यत्वेतुच्छत्वं तयोःकार्याकार्ययोरन्यत्वेमहदादीनांतुच्छरूपत्वमभावरू
पत्वंकिमर्थंमहदादयःकार्यत्वेनप्रकृतेर्लिंगंअविनाभावादेवलिंगंभविष्यतीत्यत्राह कार्यात्कारणानुमानंतत्सा
हित्यात् भवत्येवयन्नकारणरूपंकार्यंनदृश्यतेयथाचंद्रोदयात्समुद्रवृद्ध्यनुमानं अत्रतुप्रधानरूपस्यमहदादौद
र्शनात्कार्यात्कारणानुमानमेवतस्माहित्यात्प्रकृतिपुरुषस्यमहदादौदर्शनात् एवंचमहत्तत्वमेवजगत्कारणम
स्तु किंप्रधानेनेत्यतआह अव्यक्तंत्रिगुणाल्लिंगात् त्रिगुणाल्लिंगात् लयंगच्छतीतिमहातत्वात्प्रधानमनुमातव्यं
महत्तत्वंचाध्यवसायरूपंव्यक्तंविनाशिप्रत्यक्षसिद्धं तेनलिंग्यनुमानं तथाप्यन्यदेवकारणंभविष्यतिकिंप्रकृत्ये
त्यत्राह तत्कार्यतस्तत्सिद्धेर्नापलापः भवतुप्रकृतिसिद्धिः पुरुषसिध्धिस्तुनस्यादेवनहितस्यकार्यमस्तीत्यतआह
सामान्येनविवादाभावाद्धर्मवन्नसाधनं सामान्येनतावदात्मनिविवादोनास्तिविशेषेहिविवादःनेकएकोव्या
पकोव्यापकइत्यादि। यथासर्वेस्मिन्दर्शनेधर्मइतिअविवादः धर्मविशेषेहिविप्रतिपत्तिः नतत्साधनंनतत्रकार्य
कारणभावःसाधनं अन्यत्साधनंवक्ष्यामीत्यात्मसिधिः देहेंद्रियादयएवात्मानःकिमन्यकल्पनयेत्यतआह

सांख्यः भवात् व्यक्तं नन्तूपादानकारणत्वाविशेषेपि यस्यशक्यं तदेव करोति नहि तंतुर्घटस्य कारणं भवति कुतः सर्वसंभ
वइत्यत आह शक्तस्यशक्यकारणात् शक्तस्यशक्तिः शक्यविषया नवा शक्यविषयाचेत् शक्यसत्वं वाच्यं नेति
९४ पक्षेतुतुच्छाद्घटोत्पत्तिस्तदवस्था अपरंन्यायमाह कारणभावाच्च कार्यकारणयोरेकत्वात् घटाकारणपरिणतो
पिमद्रूपतांनहीजेति नचसदसतोरेकत्वंयदिद्वयोरेकत्वं स्यिंडेनापि जलाहरणं कर्त्तव्यमिति भवेदयंयघसंता
भेदः स्यात् भेदाभेदपक्षेतु नकश्चिद्दोषइति तथाच असत्वान्नास्तिसंबंधः कारणैः सत्वसंगिभिः असंबंधस्य
चोत्पत्तिमिच्छतोनव्यवस्थितिः नासतोविद्यते भावोनाभावोविद्यते सतः उभयोरपिदृष्टोंतस्त्वनयोस्तत्वदर्शि
भिः शंकते नाभावोभावयोगश्चेत् नवाच्यंयदि भावेकारणे कारणभावस्य कार्यस्यविद्यमानस्ययोगउत्प
त्तिस्तदाभविष्यति घटउत्पत्स्यतेतष्टइतिव्यपदेशोनसिद्धांतमाह नाभिव्यक्तिनिबंधनोव्यवहाराव्यवहारो यथा
शुक्लपटस्यमलिनस्यक्षालनादिनाशुक्लत्वमभिव्यज्यते तथाकुलालव्यापारात्घटोभिव्यज्यते मुद्गराभि
घातात्तिरोभूयते दृष्टोचाभिव्यक्तिः पीडनेनतिलेषुतैलस्यदोहनेनगविपयसः अवघातेनधान्येतंडुलस्ये ९४
त्यादि तस्मादभिव्यक्तिनिबंधनोशब्दप्रयोगार्थक्रियाभेदाविति अभिव्यक्तिनिबंधनोविनाशइत्यतआह

व्यापकज्ञानं वृत्तिरूपमनुमानंप्रमाणमित्यर्थः अनुमितिस्तुपौरुषेयोबोधइति शब्दप्रमाणंलक्षयति अन्व
यव्यतिरेकीपूर्ववच्छेषवत्सामान्यतोदृष्टंचसंगृहीतंवादिनामपिलक्षणान्यत्रैवांतर्हितानीतितथाच अनुमेये
नसंबद्धंचदन्विते तदभावेचनास्त्येवल्लिंगमनुमापकं शाब्दंलक्षयति आप्तोपदेशः शब्दः देशः शब्दः नन्वा
प्तेनकृतः अपौरुषेयत्वाद्वेदस्य अपौरुषेयत्वंचपंचमध्यायेपौरुषेयमितिसूत्रे प्रतिपादयिष्यामः शब्दइति
कारणकथनंफलंतुशब्दजन्यंज्ञानंशब्दः शब्दैः कार्यकारणोपचारात् युक्तइति शाक्यादिवादानांविदविरोधे
नयुक्तत्वादाभासत्वं प्रकृतिपुरुषविवेकार्थंशास्त्रारंभः नचतयोः सिद्धौप्रमाणमस्त्यत आह उभयसिद्धिः
प्रमाणात्तद्बुद्धिवेकार्थमुपदेशः वक्ष्यमाणात्प्रमाणात्प्रकृतिपुरुषयोः सिद्धिः ज्ञानंतस्मात्तद्विवेकार्थमुपदे
शायुक्तइति किंतत्प्रमाणमित्यत आह सामान्यतोदृष्टादुभयसिद्धिः प्रकृतिप्रत्यक्षाव्यक्तकारणगुणकार्यैचि
त्रितगुणात्मकमिति सामान्येनप्रकृतिसिद्धिः आत्मनोऽप्रत्यक्षत्वेपियत्संहतंतत्परार्थमित्यसंहतः परःसि
द्धः वक्ष्यति च संहतपरार्थत्वात् प्रकृतेर्नित्यत्वात्प्रवृत्तिशीलत्वाच्चसर्वदाभोगइति अनिर्मोक्षः स्यादित्यत
आह चिद्विवेकावसानोभोगः चिदात्मातद्विवेकावसानोभोगः यथाऽनादिरपिप्रागभावोनश्यति

सां॰ स्य॰ तयानिवृत्तायाः प्रकृतेर्विवेकज्ञानपर्यंतः प्रसरः अथाप्यावएवनतुभावइतिनाशभावत्वंनप्रयोजप्रध्वंसाभावे
तथाऽदर्शनात् अभयथादर्शनव्यवस्थाअत्राप्येवंयदिकर्तृप्रधानंभोक्तापुरुषः अन्यकृतकर्मणान्योभोक्ते
१३ तिस्यादित्यतआह अकर्तुरपिफलोपभोगोन्नाद्यवत् यथावस्तूपकारस्यान्नादिकर्तृत्वंअकर्तुरीश्वरस्यफलोप
भोक्तृत्वंतथात्रापि अथोद्देश्यत्वेनकर्तृत्वमीश्वरस्य अत्राप्यात्मोद्देश्यत्वेनप्रकृतेःप्रसरइति व्यवहारःसि
द्धांतमाह अविवेकाद्वातत्सिद्धेः कर्तुःफलावगमः नपुरुषः कर्तानभोक्ताकिंतुमहत्तत्त्वप्रतिबिंबितत्वात्कर्तृ
त्वाभिमानः अवैविकोद्देति प्रकृतिपुरुषयोर्विवेकाग्रहात्तत्सिद्धेःकर्तुःफलभोगाभिमानसिद्धेरिति एतद्व्य
तिरेकमाह नोभयंचतत्त्वाख्यानेविवेकात्तत्त्वज्ञानेनोभयंनकर्तृत्वंनभोक्तृत्वमितिप्रमाणमुक्त्वाप्रमेयव्य
वस्थामाह विषयोप्यदूरादेर्हानोपादानाभ्यामिंद्रियस्य इंद्रियोपादानात्संबंधाद्विषयःइंद्रियस्यहानात्सं
बंधाभावादविषयः असंबंधश्चातिदूरादेरयोग्यत्वादतिदूराद्वियतिपक्षीनोपलभ्यते अतिसामीप्याल्लो १३
चनस्थांजनंव्यवधानात्कुड्यस्थंवस्तुमनोनवस्थानाच्छोकादिग्रस्तस्यपार्श्वस्थवस्तुग्रहणंसौक्ष्म्यादणोः
अभिभवान्मर्दलध्वनिनास्वल्पध्वनिरित्यादिप्रकृतेःकथमनुपलब्धिरित्यतआह सौक्ष्म्यादनुपलब्धिः

दुरूहत्वंसौक्ष्म्यंनत्वणुत्वंप्रकृतेर्विभुत्वात् कथंतर्हिप्रकृतेर्व्यवस्थेत्यतआह कार्यदर्शनात्तदुपलब्धेः यथाघटदर्श
नात्परमाणुज्ञानंतथात्रिगुणकार्यदर्शनात्प्रकृतिज्ञानं ब्रह्मकारणंजगदितिकेचित् परमाणुकारणमित्यन्येप्र
धानकारणमितिविधाःसंशयमाह वादिविप्रतिपत्तेस्तदसिद्धिरितिचेत् तदसिद्धिः प्रधानसिद्धिःसिद्धांतमाह
तथाप्येकतरदृष्ट्याएकतरसिद्धेर्नापह यादवादिविप्रतिपत्तिमात्रेणपक्षासिद्धत्वंविपक्षेपिविप्रतिपत्तिरस्तीति
कथंतत्सिद्धिः यदिवाप्यज्ञानात् व्यापकज्ञानस्याविनाभावित्वात्पक्षसिद्धिः ममाप्येवमितिनकार्यादनुमानापला
पःकार्यात्कारणमस्तुतच्चप्रकृतिरितिकथमित्यतआह त्रिविधविरोधापत्तेः त्रिविधोगुणःसत्वरजस्तमांसित
द्विरोधस्तद्रूपंजगद्भवेत् नचेवंदृश्यतेइति कार्यस्यकिंसतउत्पत्तिरसतोवेतिसंशयंनिरस्यति नासदुत्पादोन
शृंगवत् असदेकमुत्पादंनशृंगादिसदेकस्वभावमाकाशादिसदसत्स्वभावाघटादयइति कथंनशृंगतुल्यत्वं
तत्रघटादीनांप्रागभावसमयेसत्त्वंनशृंगादीनांसर्वदाऽसत्त्वमितिद्वयोःकोविशेषःघटादीनांजन्मदर्शनंविशेषइ
तिचेत् एतदेवचिंत्यतेएतदेवोत्तरमित्यहोनैपुण्यंसत्कार्येन्यायमाह उपादाननियमात् कारणसंबंधात्कार्य
स्यसंबंधश्चविद्यमानयोरेव अन्यथासर्वदासर्वत्रसर्वकार्योत्पत्तिःस्यात् एतदेवाह सर्वत्रसर्वदासर्वासं

सांख्य० यथाप्रतिबिंबितशरीरेमणौचलति अचलत्यपिशरीरेशरीरंचलतीत्यभिमानः तथातत्सन्निधानात्प्रकृतिबिंबित
त्वादात्मनः प्रकृतेः कर्तृत्वंभोक्तृत्वमधिष्ठातृत्वमात्मनोभिमन्यते तस्माच्चेतनाधिष्ठानतिभ्रातिरितितथाचप्रकृतेः
क्रियमाणानिगुणैःकर्माणिसर्वशः अहंकारविमूढात्माकर्ताहमितिमन्यते यदिनचेतनाधिष्ठानात्संमत
१२ शरीरस्याहारादिक्रियास्यादित्यत आह विशेषकार्येपिजीवानां वायुयुक्तोबुद्ध्यादिर्जीवः नत्वात्माजीवः नत्वा
त्माजीवः आहारादिविशेषकार्येपिजीवानामेवकर्तृत्वमात्मनोऽपरिणामित्वात् आत्मनिचेत्तज्ज्ञानंनास्तिकथंज्ञा
नायोपदेशइत्यत आह सिद्धरूपबोद्धृत्वाद्वाक्यार्थोपदेशः उत्तरसूत्रस्यांतःकरणस्येतीदमावर्तनीयंतेनायमर्थः
सिद्धरूपबोद्धृत्वाद्वास्तविकरूपबोद्धृत्वान्महतोंतःकरणस्यवाक्यार्थोपदेशः तत्प्रतिबिंबितत्वाच्चपुरुषस्यबो
द्धृत्वाभिमानः एतदेवदर्शयति अंतःकरणस्यतदुपज्वलितत्वाल्लोहवदधिष्ठातृत्वं अंतःकरणस्यबुद्धेःपुरु
षच्छायापत्त्यातच्चैतन्योपज्वलितस्यचेतनत्वाभिमानादधिष्ठातृत्वं लोहवदितियथाकर्षकोलोहोनिःक्रि
योपिसन्निधिमात्रेणाकर्षयति अनुमानलक्षणमाह प्रतिबंधदृशःप्रतिबद्धज्ञानमनुमानं अविनाभा १२
वदर्शिनोव्याप्यज्ञानादनुव्यापकज्ञानमनुमानं अनेनान्वयीव्यतिरेकाअप्रतिबंधोव्याप्तिःव्याप्तिदर्शिना

नचसंसृतिः ज्ञानार्थज्ञानाच्चमोक्षइतिपारंपर्येणमोक्षसाधनत्वं यदिप्रकृतिपुरुषाविवेकज्ञानान्मोक्षोभवेत्तथा
पिक्षयित्वात्पुनरपिसंसारइतिवादिप्रतिवादिनोस्तुल्यत्वमितितत्राह निजमुक्तस्यबंधध्वंसमात्रंपरंनसम
त्वं निजमुक्तस्यस्वभावमुक्तस्यबंधध्वंसोबंधोऽविवेकः तद्विरोधिनाविवेकध्वंसोनाशः अविवेकनाशस्यच
प्रध्वंसत्वात् कुतःसंसारस्यपुनरावर्तनमितिनसमत्वंपंचविंशतिर्गणइत्युक्तं तत्सिद्धिश्चनप्रमाणेनविनेति
तद्दर्शयति द्वयोरेकतरस्यवाप्यसन्निकृष्टार्थपरिच्छित्तिःप्रमातत्साधकतमंयत्तत् द्वयोरिंद्रियार्थयोर्विद्य
मानयोःप्रत्यक्षएकतरस्यवापीतिविद्यमानस्यलिंगस्यशब्दस्यवानुमानेशाब्देचासन्निकृष्टार्थपरिच्छि
त्तिःप्रमाप्रमितिःफलं एतेनानवगतार्थगंतृप्रमाणमित्युक्तं प्रमासाधकतमंयत्तत्प्रमाणमितिप्रमाणसामान्य
लक्षणंकतिप्रमाणानीत्यत आह त्रिविधंप्रमाणंतत्सिद्धौसर्वसिद्धेर्नाधिक्यसिद्धिः प्रत्यक्षानुमानशाब्दाःप्र
माणानीति किमुपमानार्थापत्त्यभावसंभवैतिह्यानिनस्युरित्युक्तं तत्सिद्धावित्यादि प्रमेयव्यवहारार्थंप्रमा
णस्वीकारः त्रिविधप्रमाणसिद्धौसर्वप्रमाणानांप्रमेयव्यवस्थासिद्धेर्नाधिक्यसिद्धिः पृथक्प्रमाणत्वेन
त्रिविधप्रमाणेष्वेषामंतर्भावादिति इंद्रियार्थसन्निकर्षान्वयव्यतिरेकादिनायथायथंप्रत्यक्षादिषुस्व

रिभिरंतर्भावित्वात्केवलमधिकः संज्ञाभेदः कृतइतिनाधिकत्वेनप्रमाणासिद्धिः विशेषलक्षणमाह यत्संबंध
सिद्धंतदाकारोल्लेखिविज्ञानंतत्प्रत्यक्षं यत्संबंधसिद्धमित्यनुमानुमानशाब्दौ व्यवच्छिन्नौतदाकारोल्लेखिघटा
कारोल्लेखितत्प्रत्यक्षंसविकल्पकमपिप्रत्यक्षंसंगृहीतंबौद्धास्तुनिर्विकल्पकमेवप्रमाणंवर्णयंति कल्पनापोढमभ्रां
तंप्रत्यक्षमितिनामजात्यादियोजनात्मिकाप्रतीतिःकल्पनासाचसविकल्पेप्यस्तीतिनप्रत्यक्षंप्रमाणंतत्र अदुष्ट
साक्षात्कारीप्रमाजनकसामग्रीजनितंप्रत्यक्षंतत तदुभयंसविकल्पेप्यस्तीतिनप्रत्यक्षंप्रमाणंतत्र अदुभयंसवि
कल्पकंनिर्विकल्पकंचकिंतुसादृश्यात्संस्कारोद्बोधद्वारेणस्मृत्यादिसंविदुत्पद्यते अतएवाधिकप्राप्तास्त्वि
कल्पकमितिविशेषसंज्ञा नचस्मृत्याकश्चिद्दोषःसामग्रीप्रत्यक्षाद्योवाजनितः अथस्मृत्याव्यवहितत्वान्नाप्र
माणं अहोनैपुण्यंयत्सहकारिप्रामाण्यंबाधतेतथाचसंज्ञाहिस्मर्यमाणापिप्रत्यक्षत्वंनधत्ते संज्ञिनःसातट
स्थाहिनरूपाच्छादनक्षमाततःपरंपुनर्वस्तुधर्मैर्जात्यादिभिर्ययाबुद्ध्यावसीयते सापिप्रत्यक्षत्वेनसंमता
योगिप्रत्यक्षाव्यापकत्वान्नेदंप्रत्यक्षलक्षणमित्यतआह योगिनामबाह्यप्रत्यक्षत्वान्नदोषः बाह्यप्र
त्यक्षलक्षणमिदंलौकिकंयोगिप्रत्यक्षंत्वस्मदलौकिकंवा अतोनाव्यापकत्वदोषःअथवाअनेनल ९९

क्षणेनयोगिप्रत्यक्षस्यापिसंग्रह इतिपक्षांतरमाह लीनवस्तुलब्धातिशयसंबंधान्नदोषः सत्कार्यस्थि
तेर्नष्टमपिस्वकारणेलीनंभूतत्वेनास्तिभविष्यदपिस्वकारणेऽनागतत्वेनास्तियोगजधर्मानुग्रहाल्लब्धातिश
यस्ययोगिनएवप्रधानसंबंधोत्सर्वदेशकालादिसंबंधइतिनाव्यापकत्वादिदोषःईश्वरप्रत्यक्षस्यालक्षणमि
त्यतआह ईश्वरासिद्धेः यदीश्वरसिद्धौप्रमाणमस्तितदातत्प्रत्यक्षचिंतोपपद्यते तदेवनास्तिक्षित्यादितिप्र
माणमस्तीतिचेत् सकिंशरीरीअशरीरीवाउभयथापिकर्तृत्वासंभवात् विशेषवादिनांकार्यत्वस्याभावाच्च
एतदन्यत्रबहुप्रपंचितंयुक्त्यंतरमाह मुक्तबद्धयोरन्यतराभावान्नतत्सिद्धिः सकिंबद्धोवामुक्तोवाबद्ध
स्यधर्माधर्मयोगान्नेश्वरत्वं मुक्तस्यज्ञानचिकीर्षाप्रयत्नाभावान्नकर्तृत्वमितिनेश्वरसिद्धिः अथान्यएवासौ
जीवन्मुक्तइतिएवंतर्हिदृष्टांताभावादसाधारणत्वमेएतदेवाह उभयथाप्यसत्करत्वं उक्तव्याख्यानमेतत्सू
त्रंएवंतर्हिसहिसर्ववित्सर्वकर्तेत्यादिश्रुतिबाधः स्यादित्यत्राह मुक्तात्मनःप्रशंसाउपासासिद्धस्यवारागाद्य
भावान्मुक्तात्मनइवमुक्तात्मनोनतुमुक्तस्यतस्यसंकल्पकर्तृत्वाद्यभावात् तत्प्रशंसाभ्यांसोत्तमनायेति
चेतनाधिष्ठानंविनानाचेतनंप्रवर्ततेइत्यतोपिनेश्वरासिद्धिरित्याह तत्सन्निधानादधिष्ठातृत्वंमणिवत्

सांख्य॰ स्तु धर्माधर्मयोस्तूपादानकारणत्वं न कश्चिद्दृष्टं प्रकृतिपुरुषविवेकदर्शनान्मुक्तिरिति प्रकृतिस्वीकारः वेदोक्तकार्या
नुष्ठानादेव मुक्तिसंभवात् किं प्रकृत्येत्यत आह नानुश्रविकादपि तत्सिद्धिः साध्यत्वेनावृत्तियोगादपुरुषार्थत्वं वेदा
दनुश्रूयत इत्यानुश्रविको यागादिः तस्मादपि न मोक्षसिद्धिः साध्यत्वेनावृत्तियोगात् कार्यत्वेनानित्यत्वान्मुक्तस्य
१० पुनः संसारावृत्तियोगः तस्मादपुरुषार्थत्वं पुरुषार्थत्वं दर्शयति तत्र प्राप्तविवेकस्यानावृत्तिश्रुतिः तत्र प्रकृतिपु
रुषयोः प्राप्तविवेकस्य विवेकज्ञानादनावृत्तिश्रुतिः न स पुनरावर्तत इति श्रुतिः विपक्षे दोषमाह दुःखाद्दुःखं
जलाभिषेकवन्न जाड्यविवेकः यदि कर्मसाध्यो मोक्षो भवेत्कर्मणो दुःखबहुलत्वात्तत्कार्यो मोक्षोऽपि दुःखब
हुलः स्यात् अंततः क्षयित्वेनापि दुःखं स्यात् न हि जाड्यार्तस्य जाड्यविमोक्षो जलाभिषेकवत् प्रत्युत जाड्यमे
वेति दुःखस्य कर्मसाध्यत्वं सप्रयोजकं किंतु काम्यकर्मसाध्यत्वं हेतुः निःकामकर्मणो मोक्षसाधनत्वात् तथा
च श्रुतिः कर्मभिर्मृत्युमृषयो निषेदुः प्रजावंतो द्रविणमिच्छमानाः अथापरे मनीषिणः कर्मभ्योऽमृतत्वमानशु
रिसत्वत आह काम्याकाम्येऽपि साध्यत्वाविशेषात् माभून्निःकामकर्मसाध्यं दुःखं तथापि काम्यान्निष्कामवि १०
शेषेऽपि मोक्षस्य कर्मसाध्यत्वमनिष्टं साध्यत्वात् क्षयित्वेन पुनरपि दुःखं स्यात् निष्कामकर्मणो मोक्षसाध

नः कार्यात्कारणानुमानं प्रातिलोम्येनाह स्थूलात्संच तन्मात्रस्य स्थूलात्संच भूतात्कार्यात्सत्वरजस्तमोभेदेन
शांतघोरमूढरूपात् संच तन्मात्रस्य ज्ञानं बाह्याभ्यंतराभ्यां तैरहंकारस्य बाह्याभ्यंतराभ्यामिंद्रियाभ्यां तैः पंचत
न्मात्रैश्च कार्यैरहंकारस्य ज्ञानं तेनांतःकरणस्य तेनाहंकारेण कार्येणांतःकरणस्य बुद्धेर्ज्ञानं ततः प्रकृतेः त
तो महान्तस्तत्कार्यात्सिद्धस्तज्ज्ञानं संघातपरार्थत्वात्पुरुषस्य न प्रकृतेः कार्यत्वात्पुरुषस्य ज्ञानं प्रकृतेर्नित्यत्वात्पु
रुषाकारणत्वात् किंतु प्रकृतेः संघातत्वात्त्रिगुणात्मकत्वात्परार्थत्वं परश्च पुरुषः अतस्तस्य ज्ञानं सत्यासंहतो व
क्तव्यः अनवस्थाभयात् अथ प्रकृतेः कारणं भविष्यतीत्यत आह मूले मूलाभावादमूलं मूलम् मूलप्रकृतेर्मू
लाभावात्कारणाभावादमूलं यत्कारणं तन्मूलं सा प्रकृतिः अत्र युक्तिमाह पारंपर्येऽप्येकत्र परिनिष्ठेति संज्ञा
मात्रं प्रकृतेरन्यत्कारणं तस्याप्यन्यत्कारणमित्यनवस्थादोषात् ततः कारणं मूलं चव्यक्तं व्यंसैव प्रकृतिरिति
पंचविंशति तत्त्वाधिकांगीकारे चगौरवं स्यात् प्रकृतेरप्रत्यक्षत्वात्कथं कारणत्वावगम इत्याह समानः प्रकृ
तेर्द्वयोर्नादिप्रतिवादिनोस्तुल्यत्वं यथा परमाणोरप्रत्यक्षत्वेऽपि घटादौ तद्गुणदर्शनात्परमाण्वनुमानं त
थात्रापि जगत्त्रैगुण्यदर्शनात्कारणं प्रकृतिस्त्रिगुणात्मिकेत्यनुमीयते तथा हि कामिनी भर्तुः सुखदे

त्ति सात्विकी अविनयाद्दुःखदेति राजसी विरहान्मोहदेति तामसी एवं सर्वभावा द्रष्टव्याः यदि विवेकपुरुषदर्शनान्मुक्ति
स्तदा सांख्यश्रवणादेव मुक्तिः स्यात् न चैवं कस्यापि क्षिप्रं कस्यापि चिरेणेति दर्शनादित्यत आह अधिकारित्रैविध्या
न्न नियमः अधिकारिणस्त्रिविधा भवंति उत्तममध्यमाधमभेदात् तद्भेदः सहकारिणो विपर्ययादेर्भेदात् तद्भेद
९ श्चादृष्टभेदात् तन्न श्रवणमात्रादिति नियमः पूर्वप्रकृतेर्महानिति सूत्रे कार्यकारणभावः प्रतिपादितः ननुक्रमंद
तिभ्रमं निराकरोति महदाद्यं कार्यं तन्मनः प्रकृतेराद्यं कार्यं तन्महत्तत्वं बुद्धिः मननान्मन इति चरमोहंकारः अ
नंतरं बुद्धेः कार्यमहंकारः तत्कार्यत्वमन्येषां अहंकारकार्यत्वमन्येषां एकादशेंद्रियाणां पंचतन्मात्राणां पारंप
र्येण तन्मात्रकार्याणामपि भूतानां तत्कार्यत्वमित्यर्थः ननु यद्येवं प्रधानकार्यं जगदिति सिद्धांतहानिरित्यत आह
आद्यहेतुना तद्द्वारा पारंपर्येप्यणुवत् यथामस्लिंङ्कार्यस्य घटस्य पारंपर्येण परमाणुकारणता तथा प्रकृतेर
पि मूलकारणता प्रकृतिपुरुषयोर्नित्यत्वात् सृष्ट्यादौ कस्य कारणत्वमित्यत्राह पूर्वभावित्वे द्वयोरेकतरहानेना
न्यतरयोगः न पूर्वभावित्वमात्रेण कारणत्वं किं त्वन्वयव्यतिरेकाभ्यां द्वयोर्मध्ये एकस्य पुरुषस्य कारणत्वयोग्य ९
ताहानिरविकारित्वश्रुतेः अतोन्यतरस्य प्रधानस्य कारणत्वयोगः अविवादात्परमाणूनामेव कारणत्वमस्तु

स्यत आह परिच्छिन्नत्वान्न सर्वोपादानं यत्परिच्छिन्नं न तत्सर्वोपादानं तंतुर्घटस्य कारणं तस्मात्पदार्थानां पृथक्कारणं
वक्तव्यं एककारणत्वे च लाघवं स्यादिति चेदश्रुतिं दर्शयति तदुत्पत्तिश्रुतेश्च युक्तिस्तावदुक्ता श्रुतिरपि प्रधानस्य जग
त्कारणतामाह प्रधानाज्जगज्जायत इति प्रागसतो घटस्य भवनं दृश्यते नियतपूर्वभावित्वात्प्रागभावः कारणमस्त्वि
त्यत आह नावस्तुनो वस्तुसिद्धिः यद्यद्भावाद्भावयोस्सन्निः कारणरूपं कार्ये दृश्यत इति जगतोप्यवस्तुत्वं भवतु जगदप्य
वस्तुवस्तु का नो हानिरित्यत आह अबाधाद्दुष्टकारणजन्यत्वाच्च नावस्तुत्वं शुक्तौ रजतज्ञानं नेदं रजतमिति ज्ञानाद्र्ज
तबाधः न चात्र नेदं भावरूपं जगत् कस्यापि ज्ञानमित्ययं न भावरूपबाधः स्यात् दुष्टकारणजन्यत्वाच्च मिथ्यात्व
वगम्यते तथा काचकामलादिदोषात्पीतशंखज्ञानं कस्यचिदत्र जगज्ज्ञानस्य सर्वेषां सर्वदा सत्यत्वाच्च न दोषो
स्तितस्मान्नावस्तु जगदिति नन्वभावः कारणमस्तु तथाप्यभावत्वं न जगतो भविष्यतीत्यत आह भावे तद्योगेन त
त्सिद्धिरभावे तदभावात् कुतस्तरां सिद्धिः भावे उपादानकारणे कारणात्कार्यमिति तद्योगेन तत्सिद्धिः कार्यस्य व
स्तुत्वसिद्धिः अभावे जगतो भावे कारतदभावाज्जगदभावस्यावश्यंभावात् कुतस्तरां तत्सिद्धिरिति अभावस्याभा
वारूपत्वात् कर्मैव जगत्कारणमस्तु किं प्रधानकल्पनयेत्यत आह न कर्मणोपादानत्वायोगात् निमित्तं कारणम

सांख्य॰ बंधी चेदिति प्रसक्तिरित्यत आह वाङ्मात्रं तु न तत्त्वं चित्तस्थितेः संबंधीति वाङ्मात्रं तु न तात्त्विकः संबंधः असंबंधेऽपि चित्तेऽवि
वेकस्थितेः चित्तसन्निधानादात्मनि विवेकाभिमान इति निवेदयिष्यामः भवतु श्रवणादेवाविवेकज्ञानं अनेकजन्मा
८ यासस्साध्येनापरोक्षज्ञानेन किमित्यत आह युक्तितोऽपि न बाध्यते दिग्मूढवदपरोक्षादृते व्यक्तं प्रकृत्यादयः संत
तेच महदादिक्रमेण परिणमंत इति न दृष्टमित्यत आह अचाक्षुषाणामनुमानेन बोधो धूमादिभिरिव वह्नेः भवेदेवं यदि
प्रत्यक्षमेव प्रमाणं नानुमानादिकमिति प्रकृत्यादीनां दर्शनेऽपि सामान्यतो दृष्टानुमानात्सिद्धेः प्रकृत्यादीनां सृष्टि
क्रममाह सत्त्वरजस्तमसां साम्यावस्था प्रकृतिः प्रकृतेर्महान्महतोऽहंकारः अहंकारात्पंच तन्मात्राणि उभयमिंद्रियं
तन्मात्रेभ्यः स्थूलभूतानि पुरुष इति पंचविंशतिर्गणः यद्यपि त्रयाणां साम्यावस्था प्रकृतिस्तथाप्येकैकस्मिन्नपि
प्रकृतिशब्दः प्रयोगः सांकेतिकः महानिति बुद्धितत्त्वं अहंकार इत्यभिमानः पंचतन्मात्राणि इति शब्दस्पर्शरूप
रसगंधाः उभयमिंद्रियं बाह्यं पंचकर्मेंद्रियाणि वाक्पाणिपादपायूपस्थाख्यानि पंचबुद्धींद्रियाणि श्रोत्रत्वक्
चक्षुर्जिह्वाघ्राणानि आंतरं मनः स्थूलभूतानि आकाशवायुतेजोजलभूमयः तेषां पंचतन्मात्रेभ्य उत्पत्ता
ति बोद्धव्यं स्थूल इत्युपलक्षणं सूक्ष्मभूतानामपि ग्रहणं पुरुष इति संख्यापूरणार्थं न तु सृष्टिक्रमार्थं नित्यत्वादा

न्यसद्भावः को हि स्वस्यात्मा अभावायोपपतेत् मोक्षः पुरुषार्थ इति भावशब्दश्चानर्थकः अथवा नाभावव्यतिरिक्तं शून्यं ए
वं भूतस्य स्वरूपेणोपदर्शनादपुरुषार्थत्वं शून्यवादिनं निराकर्तुं देहपरिमाण आत्मेति क्षपणकमतमाह न गतिविशेषात्
न शून्यं तत्त्वं शून्यं तत्त्वं शून्यस्य गत्यागताभावात् दृश्यते च गतिः तथा च श्रुतिः अंगुष्ठमात्रं पुरुषं निश्चकर्ष बलाद्यमः
पापेन नरकं याति पुण्येन स्वर्गं याति ज्ञानेन ब्रह्मलोकं यातीति तद्दूषयति निष्क्रियस्य तदसंभवात् व्यक्तं निष्क्रियत्व
मेवाह मूर्तत्वात् घटादिवत्समानतदसंभवात् व्यक्तं निष्क्रियत्वमेवाह मूर्तत्वाद्घटादिवदयः क्रियावंतः तत्तुल्यधर्मत्वेवि
नाशादयात्सिद्धांतः किंचजन्मांतरसंचारे हस्तिकायादिदेहपरिमाणत्वात्संकोचविकासिते न सावयवत्वादनित्यादि
नित्यत्वमिति एवं चांगुष्ठमात्रमित्यादिश्रुतिविरोध इत्यत आह गतिश्रुतिरप्युपाधियोगादाकाशवत् यथा घटा
द्युपाधिभेदात् घटेऽपि गच्छति घटाकाशं गच्छतीति ज्ञानं तथा शरीरावच्छेदादात्मा गच्छतीतीति प्रतीतिः किमुपाधि
ना कर्मवैचित्र्याद्विशेषो भविष्यतीत्यत आह न कर्मणाप्यतद्धर्मत्वात् भवेदेवं यदि कर्मात्मधर्मः स्यात् तत्रात्म
नः कश्चिद्धर्मोऽस्ति निर्गुणत्वात् तद्धर्म एव कर्म भविष्यति को विरोध इत्यत आह नैर्गुण्यादिश्रुतिविरोधश्चेति
असंगो ह्ययं पुरुष इति श्रुतिविरुद्धं स्यात् मा भूदात्मधर्मोऽन्यधर्मेणापि क्रियाविशेषो भविष्यति आत्मनो

व्यापित्वेन सर्वसंबंधादित्यत आह अतिप्रसक्तिरन्यधर्मत्वे सर्वसंबंधाविशेषान्मुक्तात्मनामपि बंधप्रसक्तिः
ननु तथापि धर्माधर्मव्यवस्थास्ति बद्धस्य मुक्त्यर्थं प्रवृत्तिर्दृश्यते तत्रयस्तु व सिद्धांतः सोस्माकं भविष्यतीति स
 मामित्यत आह तद्योगेप्यविवेकान्न समानत्वं धर्माधर्मयोपि न समानधर्मत्वं अविवेकात् यदि तावद्विवेको धर्मा
धर्मयोग आत्मनः स्यात् तदा तुल्यत्वं किं त्वविवेकादात्मनो धर्माधर्मयोगाभिमान इति कसमानत्वं भवत्तु विवेका
द्वस्तुवस्तथाप्यविवेकनाशाद्धर्मस्वीकरणात्तुल्यं अन्यथा सर्वदा बद्धः स्यादित्यत आह नियतकारणात्तदुच्छित्ति
र्ध्वांतवत् अन्वयव्यतिरेकाभ्यां यस्य यत्कारणमवगतं तद्व्यभिचारे सर्वः सर्वतो नाश्वासः यथा ध्वांतनाशाय
प्रकाशः तथात्रापि विवेकादविवेकनाशः विवेकार्थं धर्मस्वीकारेकाक्षतिः प्राकृतेनापि धर्मेणोपपत्तेः किमि
दं ध्वांतं नाम अभाववस्तु मइति केचित् तन्न विधिमुखप्रतीतेः अभावत्वे किमालोकप्रागभावः प्रध्वंसाभावो वा
यदि प्रागभावः प्रध्वंसाभावो वा यदि प्रागभावः यथा घटउत्पन्ने घटप्रागभावो नष्टस्तथालोके सत्यालोकप्राग
भावो नष्ट इति प्रत्ययः स्यात् भविष्यालोकप्रागभावसत्त्वे वर्त्तमानालोके सत्यंधकारो विनष्टः स्यात् अथ प्रध्वं
साभावस्तथाप्यनश्वरत्वादालोकांतरे सत्यंधकारप्रतीतिप्रसंगः यथा घटांतरे उत्पन्ने नष्टघटध्वंसोस्त्येव अ

न्योन्याभाववस्तु वस्तुनो रूप्यस्तीति अत्यंताभावस्तु दुष्टत्वान्नाशंकनीयः तदुक्तं न च भासामभावस्य तमस्त्वं वृद्ध
संमतं छायायाः कार्ष्ण्यमित्येवं पुराणेषु गुणश्रुतेः दूरासन्नप्रदीपादिमहदल्पाचलाचला देहानुवर्त्तिनी छाया
न वस्तुत्वाद्विना भवेत् भाववस्तु मइति तु व्यपदेशोभावे सति प्रतीयमानत्वादिति आलोके सति वस्तुग्रहणं तदभावे
सति प्रतीयमानत्वादिति आलोके सति वस्तुग्रहणं कथं ग्रहणमिति वैधर्म्यमात्रं यथा कौशिको भानिरपेक्ष एव ग
ह्णाति तथालोकानपेक्षमेव तमोग्रहणं वैचित्र्यादेः पदार्थस्य तस्माद्रूपविशेषोयं यत्राबरकमस्ति तत्रारोप्य ग
ह्यते द्रव्यांतरमिति केचित् तदुक्तं ततः खलु चलं नीलं परापरविभागवत् प्रसिद्धधर्मवैधर्म्यान्नवभ्यो भेत्तुम
र्हति अथ पक्षवत्तुगुणो वा द्रव्यं वा नास्माकं सिद्धांतः क्षतिः अनियतपदार्थवादित्वात् अभावस्तु न भवतीति क्र
मः विवेकान्मुक्तिरित्युक्तं घटपटादीनामप्य विवेको स्म दीत्सीति सर्वमुक्तिप्रसंगइत्यत्राह प्रधानाविवेका
दन्याविवेकस्य तद्धाने हानं सर्वेषां मूलं प्रधानं तस्याविवेकादन्याविवेकस्य संभवः पदार्थानामन्योन्यभ
त्वविवेको विवेकवान्तेन बंधमोक्षौ किंतु प्रधानविवेकाविवेकाभ्यां अतस्तद्धाने प्रधानाविवेकहाने सर्वा
विवेकहानं भवतु विवेकान्मुक्तिः साकिमात्मसंबंधीन वा आत्मसंबंधी चेदात्मनः कूटस्थत्वव्याघातः अस

सांख्य० नास्तिकुतस्तस्यनाशानाशचिंताकथंतर्ह्यघटंभूतलमितिज्ञानंभूतलालंबनंचेत् घटवत्यपिभूतलेतदभावज्ञानप्र
संगभूतलस्यतादवस्थ्यात् केवलभूतलालंबनमभावज्ञानं घटेसतिकैवल्यंनास्तीतिचेत् किंभूतलस्वरूपमा
त्रंकैवल्यंतदतिरिक्तंवा यदिस्वरूपमात्रंघटेसत्यपितस्याप्रच्यवादभावज्ञानंस्यात् अतिरिक्तपक्षेसएवा
६ भावः अथभूतलस्यैकाकित्वेऽभावव्यवहारःघटेसत्त्वमेकत्वसंख्यावा अन्यद्वाऽकत्वसंख्यावाघटवत्य
पिभूतलेऽस्त्येव अन्यदितिपक्षेसएवाभावः विषयवैलक्षण्येविज्ञानवैलक्षण्याभावात् ननुभावाभावयोः
संबंधाभावात् कथमभावज्ञानमिति यथाघटोयमितिइंद्रियान्वयव्यतिरेकात् ज्ञानंतथाअभावज्ञानमपि
सकारणंकार्यदर्शनाद्धिकारणपरिकल्पतेनतुदृष्टकार्यापलापःशक्यतेकर्तुंकिंचानियतपदार्थवादिना
प दस्माकंयथोपपन्नः संबंधोपिकश्चिद्वक्ष्यतिकानोहानिः तस्मान्नास्त्यभावइति समाधानांतरमाह
य उभयपक्षसमानयोगक्षेमात्वमपि अयमपिशून्यवादः क्षणिकपक्षविज्ञानपक्षतुल्ययोगक्षेमान्निराकार्यः य
थाप्रत्यक्षप्रत्यभिज्ञयाक्षणिकनिराकरणंबाह्यवस्तुप्रत्यक्षाद्विज्ञाननिराकरणं तथायमपि ६
प्रत्यक्षेणैवसकलवस्तुदर्शनाच्छून्यवादोनिराकार्यः दूषणांतरमाह अपुरुषार्थत्वमुभयथायदिहि

पुत्रस्यसंस्कारद्वाराउपकारःक्रियते तथात्रापिभविष्यतिसिद्धांतमाह नास्तिहितत्रस्थिरएक आत्मायोगभि
धानादिकर्मणासंस्क्रियते आत्मानादिर्निर्मुक्तःशुद्धबुद्धः तदुद्देशेनहविस्त्यागादयोयुज्यंतइति आत्मास्थिरबोधः
सिद्धस्तत्राह स्थिरकार्यासिद्धेः क्षणिकत्वेसत्यर्थक्रियाकारित्वं तच्च क्रमाक्रमाभ्यांव्याप्तंतौचक्षणि
केनसंभवतः अतस्तोक्षणिकत्वमापादयतःपरिहरति नप्रत्यभिज्ञावाधात् यद्यपिसहकारिसद्भावासद्भावाभ्यां
करणाकरणन्यायेःस्थिरसिद्धिःसमाधेयातथापिसर्ववाधविवादसिद्धत्वात् सएवायमितिअबाधितप्रत्यभिज्ञा
बाधउक्तः एतदन्यत्रप्रपंचितमितिनेहप्रतन्यते दूषणांतरमाह श्रुतिन्यायविरोधाच्च श्रुतिराह अस्तिजन्मांतर
फलोपभोक्तापुरुषःन्यायश्चकोनामानुपभोग्येकर्मणितत्साधनेप्रवर्तते कारुणिकानांविरागात्प्रवृत्तिर्दृश्यते
न तत्रापितदुपकारेणस्वधर्मलाभात् धर्मानभिसंधानेपिमोक्षसाधनत्वात् दूषणांतरमाह दृष्टांतासिद्धेश्च
सर्वस्यैवपक्षप्रवेशान्नास्तिदृष्टांतः अप्रवेशोसएवस्थिरः अथतस्यापिक्षणिकत्वमन्यहेतुनासाध्यतांतत्रा
पिदृष्टांतासिद्धिरितिक्षणिकपक्षएवार्थक्रियानसंभवतीत्याह युगपज्जायमानयोर्नकार्यकारणभावःसव्ये
तरविषाणयोरिवयुगपज्जायमानयोःस्वलक्षणार्थक्रिययोः एतच्चासकृदुक्तं पूर्वापरकालभावितामात्रा

सांख्य० कार्यकारणभावोभविष्यतीत्यत्राह पूर्वापायेउत्तरायोगात् भवेदेवंयद्यतिशयाधायकत्वंस्यात्तदेवत्वक्षणिकत्वंक्षणि
कत्वादिति एतत्स्पष्टयति तद्भावेतदयोगादुभयव्यभिचारादपिन हेतुहेतुमद्भावकालेकार्याभावादुभयव्यभिचाराद
५ पिनकार्यकारणभावः आस्तांतदर्थक्रियाकारित्वंअयंहेतुरिदंकार्यमितिव्यवहारोपिनस्यात् अथहेतोःकार्यका
लेसत्वमप्रयोजकं पूर्वकालभावितामात्रेणभविष्यतीत्यतआह पूर्वभाविमात्रेननियमः किंभिन्नसंतानस्यएक
संतानस्यवा भिन्नसंतानस्यचेदतिप्रसंगः एकसंतानस्यचेन्निरन्वयध्वंसस्तस्यहिभिन्नसंतानेनतुल्यत्वान्नानि
यमः अन्वयश्चनास्तिस्फुटं अथाविद्यमानस्यापिहेतुतादृश्यते यथेषुक्षेपणस्यक्षेपानंतरमपस्मारादिनाम
रणं पश्चादिषुविद्धस्यमरणकर्तृत्वं नतत्रापिमरणद्वारेणान्वयात् वाह्यवस्तूपरागाद्दुइस्फुटं ननुबाह्यंचवस्तु
नास्तिविज्ञानात्मकत्वाऽऽगवदितिविज्ञानवादिमतंनिराकरोति **नाविज्ञानमात्रंबाह्यप्रतीतेः** नाविज्ञानमात्रंजगत्
तथासत्यहंघटइतिप्रत्ययःस्यात् नत्वयंघटइतिवासनाविशेषादितिचेत् बाधाभावेघटवासनायाएवासत्वा
त्कथंविशेषः किंच वासनाया अपिकारणंवासनैव उक्तवासनापि वासनापीतियक्षेऽन्यथायिसत्वात् सएवबा
ह्यार्थः ननुनास्त्येववाह्यार्थः अवयविन्यभावात् तथाह्यवयवावयविनोरेकत्वात् एकत्वप्रतीतेचलत्स्ववयवेऽवयवीचल ५

त्स्ववयवेऽवयवीचलतीति अन्यावयवेनचलत्यवयवीनचलतीतिविरुद्धधर्माध्यासेनभेदान्नैकत्वं एवंरक्तारक्ता
वृतानावृततद्देशातद्देशत्वादिदोषाउदाहार्याः माभूदवयवीतथापिनवाह्यार्थोपलापः परमाणुपुंजस्यैवस्थूलत्वेन
ग्रहणात् नअवयविनाहिकार्येणपरमाणुरनुमातव्यः तदभावात्कानुमानंपरमाणूनामतीन्द्रियत्वात् पुंजेपिकिं
चिदतिशयानाधानात् स्थूलोयमितिप्रत्ययोभ्रांतइति विज्ञानमात्रंजगदिति अत्रोच्यते अवयवावयविनोभे
दादपिद्वयोरन्यत्वात्तावयवकंपेलेशस्त्रीकंपेत यत्रबहुतरावयवकंपेतत्रावयवीकंपतएव एवंरक्तारक्तादि
विरोधेपिसिद्धांतावक्तव्याः तस्मात्सिद्धोबाह्योऽर्थः वासनैवेति पक्षेसर्वदाज्ञानोत्पत्तिरिति निर्विषयस्यज्ञानस्या
दर्शनाद्विषयाभावात् कर्तृकर्मविरोधः शून्यंतत्त्वंभावोविनश्यतिवस्तुधर्मत्वाद्विनाशस्य यदिभावरूपंतत्त्वं
स्याद्भावस्यनाशात्स्वनाशेऽनिर्मोक्षः वस्तुधर्मत्वादिनाशस्यवस्तुनोऽवश्यंविनाशात् समाधानमाह **अपवा
दमात्रमबुद्धानां** भावोनश्यतीतिबाह्यात्रंतुनतत्त्वं अबुद्धानामज्ञातशास्त्राणांप्रागभावस्याविनाशदर्शना
त् सत्कार्यसिद्धौभावस्याविनाशात्तिरोभावेनाशशब्दप्रयोगेपिप्रकृतिपुरुषयोरनाशात् नन्वभावएव

सांख्य० तोयंबंधोभविष्यतीतितिन अस्माकंतावद्वासनयासहाआत्मनःसंबंन्धाभावः योऽङ्गनयेस्थिरस्यात्मनोमतेसत्वां
द्वासनायाअपितावत्कालंस्थिरस्वभावात्कोनबद्धइति वाह्यवस्तूपरागाद्वासनासंतानेनात्मसंतानस्यबंधोभवि
४ ष्यतीत्यत आह॥ नबाह्याभ्यंतरयोरुपरज्योपरंजकभावोपिदेशभेदात्स्रुघ्नस्थपाटलिपुत्रस्थयोरिव २८ यथा
च्येतरविअलभाजनयोरपिदृष्टउपरागः नतत्ररश्मिसंबंधादुपरागः अत्रतत्संबंधोनास्तिवासनाद्वारेणचेन्न।
तावत्कालासत्वात्कथंसंबंधः संतानस्यचेत् यदिसंतानीव्यतिरिक्तः सिद्धांतहानिः अथाव्यतिरिक्तस्तथापि
तेनाकिंचिदाधेयंआधानंतच्छक्यंक्षणिकत्वात् अनाधानेकिंतेनासत्कल्पनेति माभूद्वासनयाआंतरोपरा
गआत्मनोव्यापित्वाद्वाह्यैकदेशेनात्मसंबंधादुपरागोभविष्यतीत्यत आह द्वयोरेकदेशलब्धोपरागान्नव्यव
स्था २९ एकात्मवादिनांसर्वदालब्धोपरागादनिर्मोक्षइतिनास्तिव्यवस्था नानात्मवादिनांतुसर्वेषांसर्वा
र्थैःसंबंधादेकदातुल्यज्ञानोत्पादान्नव्यवस्थाशंकते अदृष्टवशाच्चेत् यद्यपिसर्वदासंबंधात्सर्वत्रज्ञानंस
म्पते तथापियस्यादृष्टेनयज्ज्ञानंजन्यते तदेवतस्यकारणमितिनसर्वत्रज्ञानंदूषणमाह नद्वयोरेककाला ४
योगादुपकार्योपकारकभावः ३१ व्यक्तंशंकते पुत्रकर्मवदितिचेत् ३२ यथापुत्रेष्ट्यादिनाः वियमानस्य

रीतावेतावुभावपिनकिंचन एतदेवदृढयति स्वभावस्यानपायित्वादननुष्ठानलक्षणमप्रामाण्यं नित्यस्वभावस्य
बंधस्याप्रच्यवात्तन्नाशार्थमनुष्ठानमशक्यमिति कश्चिद्विप्रलंभायाशक्यमप्युपदिशति यथांगुल्यग्रेकरियूथ
शतमित्यत आह। नशक्योपदेशविधिरुपदिष्टेप्यनुपदेशः स्पष्टं शंकते शुक्लपटवद्बीजवच्चेत् स्वभावस्यापिनाशो
दृश्यते यथापटेशुक्लत्वस्यरागादिभिः बीजस्यचांकुरजननात् सिद्धांतमाह शक्त्युद्भवानुद्भवाभ्यांनाशक्योपदेशः
सत्कार्यसिद्धेर्नपटस्यशौक्ल्यं नष्टं किंतुरागाद्यभिभूतंक्षालनात्पुनरुद्भूतं अंकुरजननादपिनबीजंनष्टंकिंत्वभि
भूतंतस्यचपुनरुद्भवोदृश्यते वस्तुवैचित्र्यात् ननु आत्मास्वभावतोनबद्धः किंतुकालवशाद्बद्धोभविष्यतीत्यत आह
नकालयोगतोव्यापिनोनित्यस्यसर्वसंबंधात् १२ भवत्वयंयदितस्यकदापिकालयोगःस्यात्तन्नस्याद्वानित्य
स्यव्यापिनःसर्वकालसंबंधोपाधित्वात् नित्यस्येतिसर्वकालसंबंधेप्राप्तेव्यापिनइतिउत्तरसूत्रपर्यालोचनया
संघाताद्यातदेहवैवशाद्बद्धोभविष्यतीत्यत आह॥ नावस्थातोदेहधर्मत्वात्तस्याः तस्याअवस्थायादेहधर्मत्वाद
रूपलक्षणं अपरिणामित्वादितिपरमार्थः आत्मनोपिअवस्थाभविष्यतीत्यत आह असंगोयंपुरुषइतिश्रुति
रस्तिसाबाधितास्यात् १५ कर्मवशाद्बद्धोभविष्यतीत्येतद्दूषयति नकर्मणान्यधर्मत्वादतिप्रसक्तेः निर्गुणा

त्वादात्मनःकर्मणोनात्मधर्मत्वंकिंत्वन्यधर्मेणाणिकर्मणाबद्धोभविष्यति तदप्युक्तं नह्यन्यधर्मेणान्यत्रकिंचिद
धीयते विश्वस्यवैचित्र्यानुपपत्तेः अतिप्रसक्तेश्चेतिमुक्तानामपिबंधप्रसंगोऽन्यत्वाविशेषादितिदूषणांतरमा
ह विचित्रभोगानुपपत्तिरन्यधर्मत्वे १७ दृश्यंतेकेचित्सुखिनःकेचिद्दुःखिनःनचानादौसंसारेकेनापिसुख
हेतुकर्मवानकृतं अन्यधर्मेणान्यत्रकार्यजननेप्रकृतिर्नियामिकाभविष्यति यत्पुरुषंप्रतिसाप्रवर्त्ततेतस्यबं
धोभविष्यतीत्यत्राहप्रकृतिनिबंधनाच्चेन्नतस्याअपिपारतंत्र्यं १८ प्रकृतेरपिव्यापित्वात्सर्वपुरुषसंबंधा
विशेषात्कर्मणाविनानानियमइतितस्याअपिकर्मपारतंत्र्यान्नप्रोक्तोदोषः यदिप्रकृत्यादिनिबंधनआत्मनो
बंधोनास्तिस्वभावेननास्तितर्हिमोक्षशास्त्रोपदेशोव्यर्थःस्यादित्यत्रासिद्धांतमाह ननित्यशुद्धमुक्तबुद्ध
मुक्तस्वभावस्यतद्योगस्तद्योगादृते शुद्धेतिगुणासंगी बुद्धेतिस्वच्छः तद्योगःबंधयोगः तद्योगादृतेअविवेकं
विनानात्मनःस्वतः कदापिबंधःकिंतुअविवेकाद्बंधइत्यभिमानःसचशास्त्रोपदेशान्नामवेदितव्यः अन्या
विद्ययोगात्तस्यबंधोभविष्यतीत्यत्राह नाविद्यातोऽप्यवस्तुनाबंधायोगात् २० अविद्याहिविद्याप्राग
भावःप्रध्वंसाभावोउभयथाप्यवस्तुनचावस्तुनावस्तुनःआत्मनःसंभवतिसंबंधः तस्मादविद्ययाबं ३

धइतिव्यपदेशमात्रंनतत्त्वे विद्ययाबंधइतिव्यपदेशमात्रंनतत्त्वं विद्यातोऽन्याऽविद्यावस्तुभूताभविष्यतीत्यत्रआ
ह वस्तुत्वेसिद्धांतहानिः २१ अस्माकंतावदविद्यायाःसद्रूपत्वेनाभावादनिर्मोक्षः अद्वैतिनांत्वविद्यानतात्त्विकी
द्वैतवादिनांसनादेर्वस्तुभूतस्यनाशाभावाद्दुपदेशानर्थक्यंदूषणांतरमाह विजातीयद्वैतापत्तिश्च यद्यविद्याव
स्तुभूतानादिस्तदानित्यात्मगुणतुल्या अनात्मत्वेविजातीयद्वैता अथान्यपदार्थानामीदृशीगतिःअविद्यातुवस्तु
भूताअनादिरपिविनंक्ष्यतीत्याह विरुद्धोभयरूपाचेत् अन्योन्यविरुद्धरूपाअनादिरपिनाशात्प्रागभावस्व
पाउत्तरमह।।नतादृक्पदार्थाप्रतीतेः २५ नकुत्रापिकदापितादृक्पदार्थःप्रतीतः यद्येवंप्रकृत्यादीनांषट्प
दार्थवैधर्म्यात् कुतःप्रवेशइत्यत्राह नवयंषट्पदार्थवैधर्म्यात् कुतःप्रवेशइत्यत्राह नवयंषट्पदार्थवादि
नोवैशेषिकादिवत् स्पष्टंयद्यनियताःपदार्थाःकथंपंचविंशतितत्त्वंइत्यत्राह अनियतत्वेपिनायौक्तिक
स्यसंग्रहोऽन्यथाबालोन्मत्तादिसमत्वं २६ षडेवपदार्थाइतिनब्रूमोनतुयुक्तिसिद्धमपिनांगीकुर्मः अन्य
थाबालोन्मत्ततुल्यत्वंतथाच नह्यप्रवादानभसोनिपतंतिमहासुराः युक्तिमद्वचनंग्राह्यंमयान्यैश्चभवद्वि
धैः बौद्धपक्षंनिरस्यति नानादिविषयोपरागनिमित्तोस्य २७ अस्यात्मनोऽनादिविषयवासनात्मि

र्थत्वं ३ यथाप्रत्यहंक्षुत्प्रतीकारग्यवरान्नभक्षणादिनातृप्तस्यपुरुषार्थता तथादुःखनिवृत्त्यैऔषध्यादिनापुनः
प्रतीकारात्पुरुषार्थत्वमिति सिद्धांतमाह सर्वासंभवात्संभवेपिसत्तासंभवाद्धेयः प्रमाणकुशलैः ४ नहिसर्वदेशेस
र्वदेशेसर्वदिशेसर्वकालेवावैद्यादयःसंतिसंभवेपिवानात्यंतत्रिविधदुःखनिवृत्तिःस्यात् अवश्यंहिदेहनिबंध
नाद्रागादीनांसंभवःदेहीसुखीतिनिदृष्टमिति तस्मादेषपुरुषार्थः प्रामाणिकैःहेयःशास्त्रगम्यश्चोपादेयःयुक्त्यं
तरमाह उत्कर्षादपिमोक्षस्यसर्वोत्कर्षश्रुतेः ५ अथवादुःखत्रयनिवृत्तेरन्योन्यमुत्कर्षोद्दिष्टोमोक्षश्चसर्वोत्कृष्टो
नित्यत्वादेकत्वात्सर्वदुःखोच्छेदरूपत्वात् ननुनास्त्येवतद्दर्शनंयत्रमोक्षोनपुरुषार्थः नचौषध्यादिनादुःखनि
वृत्तिमात्रंमोक्षः तस्माद्यस्त्वयसिद्धांतःसोस्माकंभविष्यतीत्याह अविशेषश्चोभयोः ६ स्वपक्षसिद्ध्यापरपक्ष
उपलभ्यते नत्वन्यथाउक्तंच यत्रोभयोःसमोदोषःपरिहारोपिवा समः नैकःपर्यनुयोज्यःस्यात्तादृगर्थविचा
रणे किंस्वभावतोबद्धस्यमोक्षसाधनोपदेशोऽन्यथावेत्यत्राह नस्वभावतोबद्धस्यमोक्षसाधनोपदेशवि २
धिः स्वभावभावनाशात्स्वरूपनाशप्रसंगात् उक्तंच वस्तुस्थित्यानबंधोस्तितदभावान्नमुक्तता विकल्पघ

अनिरुद्धप्रणीतसांख्यसूत्रवृत्तिप्रारंभः श्रीशोजयतितरां ७

श्रीगणेशाय नमः ॥ ॐ ॥ विनायकं नमस्कृत्य विष्णुं सूर्यं सरस्वतीं लक्ष्मीं गंगां महेशानं वृत्तिं कर्तुं समारभे १
पुरुषः खलु वैराग्यान्मोक्षसाधनशास्त्रे प्रवर्त्तते वैराग्यं च विद्यास्यात् शोकादिना वा जन्मांतरीयदुरितक्ष
याद्वा तथा च श्रुतिः यदहरेव विरज्येत्तदहरेव प्रव्रजेदिति शास्त्रप्रवृत्तस्य च परवैराग्यान्मुच्यते तथा चाह
पातंजलिः दृष्टानुश्रविकविषयवितृष्णस्य वशीकारसंज्ञा वैराग्यं तत्परं पुरुषख्यातेर्गुणवैतृष्ण्यं तदेव परं
वैराग्यं वक्तुमतिकारुणिको महामुनिर्जगदुद्दिधीर्षुः कपिलो मोक्षशास्त्रमारभमाणः प्रथमसूत्रं चकार
अथ त्रिविधदुःखात्यंतनिवृत्तिरत्यंतपुरुषार्थः १ अथशब्दो मंगलार्थः न तु कर्मानंतर्यार्थः यहरेवेत्यादिश्रु
तेरानंतर्यार्थस्य मंगला प्रयोजनत्वात् कर्मारंभे च मंगलकरणं न्याय्यं अथशब्दश्च मंगलवाचको दृश्यते
ओंकारश्चाथशब्दश्च द्वावेतौ ब्रह्मणः पुरा कंठं भित्त्वा विनिःक्रांतौ तेन मांगलिकावुभाविति त्रिविधदुः
खत्वं शारीरमानसिकयोराध्यात्मिकत्वेन संग्रहणादेकत्वं आधिभौतिकं पश्वपक्ष्यादिजनितं आधिदै १
विकं ग्रहभूतादिजनितं नन्वेवं तेषां निवृत्तिः स्वत एव सुखदुःखानां क्षणावस्थायित्वादत आह

अत्यंतेति न दुःखविशेषाणां निवृत्तिरभिमता किं तु दुःखजातीयानां भविष्यतामपि हि निवृत्तिरत्यंतशब्दार्थः धर्मार्थका
ममोक्षाणां पुरुषार्थत्वं न तु त्रयाणामत्यंतत्वं क्षयित्वाद्विषयजसुखत्वात् मोक्षस्य च न क्षयो नित्यत्वात्प्रकाशरूपत्वा
च्च अत उक्तमत्यंतपुरुषार्थ इति भवतु दुःखनिवृत्तिः पुरुषार्थः तथापि दृष्टादेव सुकरोपायात्तत्सिद्धेः शास्त्रसाध्ये
दुष्करोपाये अनेकजन्मपरंपरया संपाद्ये चित्तनिरोधादौ कः स्वस्थात्मा प्रवर्त्तेत तथा च अर्के चेन्मधु विन्देत कि
मर्थं पर्वतं व्रजेत् इष्टस्यार्थस्य संसिद्धौ को विद्वान्यत्नमाचरेत् तथा हि शारीरदुःखनिवृत्तये औषध्यादयः संति
मानसदुःखनिवृत्तये प्रवरस्त्रीमिष्टान्नादयः संति आधिभौतिकनिवृत्तये च नीतिशास्त्रार्थवादिभिः प्राप्ता
नानाप्रकाराः संति आधिदैविकदुःखनिवृत्तये च शांतिमणिमंत्रादयः संतीत्यत्रोत्तरसूत्रं न दृष्टात्तत्सिद्धिर्निवृ
त्तेरप्यनुवृत्तिदर्शनात् न वयं निवृत्तिमात्रं पुरुषार्थं ब्रूमः किं त्वत्यंतनिवृत्तिः औषध्यादिना वश्यं दुःखं नि
वर्त्तते यद्यपि कथंचिन्निवर्त्तेत पुनरन्येन न भवितव्यमिति नास्ति नियमः भवतु दुःखनिवृत्तिस्तथापि न पुरुषा
र्थः पुनः पुनस्तथाविधप्रतीकारकरणादित्याह प्रात्यहिकक्षुत्प्रतीकारवत्तत्प्रतीकारचेष्टनात्पुरुषा